CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतापचरितम्

महावीर प्रसाद जोशी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसादसाहित्यम्

(१) पंचतंत्र (हिन्दी पद्यानुवाद) (२) बिदा (३) शक्ति-शतक (४) शिवमहिम्न : स्तोभ (हिन्दी पद्यानुवाद) (५) बिन्डाबन (राजस्थानी काब्यं) (६) मथरा (राजस्थानी काब्यं) (७) प्रार्थना पुष्पाञ्जलि

सम्मतिः

जोशीत्युपाह्वस्य साहित्याचार्यस्य महावीर प्रसाद शर्मणः प्रताप-चरिताख्यं काव्यमिदं दर्शं दर्शं परमानन्दं विन्दे। प्रायः सर्वत्रैवात्र काव्ये प्रतिभावता दयितया कवितावनितया स्वयं वृतेन कविवरेणानेन ध्वन्यादिप्रदर्शने परमेण प्रयत्नेन वैशिष्ट्यं व्यक्तीकृतम्। अनुप्रासे तु कविरयं सिद्धहस्तएवइति नात्रात्युक्तिलेशावकाशोऽपि।

दुष्करे हिन्दी-भाषाच्छन्दः-समूहे (दोहा-सोरठा-घनाक्षरी-रोला-हरिगीतिकादि रूपे) काव्यमिदं विरच्य कविना नवीनमेव रचना-कौशलमुपस्थापितं सुधियामपचितौ गुणिगणगणनारम्भे पुरस्सरतां गतोऽयं सुधीश्चिरं जीयात्। स्वप्रतिभया काव्यकलाकलापं दिक्षु विदिक्षु च विस्तार्यमाणो नीहारहार-प्रतिमां कीर्तिमाश्रयेत। इति विरमति

डूंडलोद

कविताप्रणयवशम्वदो
बालशास्त्री श्रीधराचार्यः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतापचरितम्

(खण्डकाव्यम्)

महावीरप्रसाद जोशी
साहित्याचार्यः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक :

महावीरप्रसाद जोशी

विवेक प्रकाशन

पो. बा. नं. ११

सादुलपुर ३३१ ०२३

⊙

प्रथमावृत्तिः १९८२

⊙

मूल्यम् - दश रूप्यकाणि

⊙

सर्वेऽधिकारास्सुरक्षिताः

(ALL RIGHTS RESERVED)

मुद्रक :

प्रेस हाऊस (शर्मा प्रेस)

राजगढ़ रोड़

पिलानी (राज०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतापचरितम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समर्पणम्

गुरुदेव - वरिवस्याऽधिगत - वाग्वैभवोऽयमकिञ्चनः ।
गुरुपाद-पद-पङ्कजयोस्समर्पयते कृपा-भाजन-जनः ।।

काव्यं हठादाकृष्टकतिपय-पद-निचयरचनामयम् ।
पावन - प्रताप-प्रताप - परिमार्जित-दुरित-दोषोदयम् ।।

चरण-रेणु-कणः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीगुरु-वन्दना

गिरीशः **श्री**कण्ठो हृदि दधदहिंसाकृतिमलम् ।
विभूत्या **यु**क्तोऽसौ विविधविबुधाऽऽराधितपदः ।।

वृषाऽऽस–**क्त**स्वान्तो निगमविदितः कामविजयी ।
धियो मे **वि**द्योतं प्रकटयतु शम्भुर्गुरुवरः ।।

कृती **विद्या**-वृन्दे प्रथमनमनीयः सुमनसाम् ।
गुणानां **भू**मानं दधदतुलमानं च हृदये ।।

कलाको–**ष**स्वामी परिषदि वृषाऽध्यापनचणः ।
सुगीर्वा–**ण**श्रेष्ठो जयति वत वाग्मी गुरुवरः ।।

गुणैर्यः **पं**डायाः सपदि परमानन्दमभजत् ।
दयालु – **डि**म्भेभ्यो हितकरपुराणानचकथत् ।।

श्रुतीनां **त**त्त्वज्ञो व्यधित च महाभारतमतिम् ।
स वन्द्यः **श्री**लक्ष्माऽऽशुकविलसितो व्यासपदभाक् ।।

श्रीसीता–**राम** सेवापरिचितहृदयस्तद्यशः ख्यापनं यः ।
कर्त्तव्यं **म**न्यमानः प्रयतननिरतः पूर्ण - साफल्यमापत् ।।

नृणां वाग्**धा**रया योऽमृतरसनसुखाभिज्ञमन्तर्व्यधासीत् ।
शुद्धाचा **री** गतोऽत्र प्रथमकविपदं वन्दनीयो गुरुः सः ।।

कल्पो यो **जी**वकल्पः पिपठितु मनसां कल्पवृक्षः सुकल्पः ।
कल्पे यः **शा**सको वै कवनगणितयोः कल्पते सद्विकल्पान् ।।

वृद्धः **शा**स्त्रीय-बोधे नृपनयनिपुणः शब्दसिद्धान्तवेत्ता ।
वन्द्यो विद्वत्समाजे जयति गुरुवरः श्रीयुतो रामधारी ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परम-पूज्याः श्रीगुरवः
विद्यावारिधि-पण्डित-श्रीरामधारिशास्त्रिणः
(डुंडलोदस्थ-गोयनकासंस्कृतमहाविद्यालयस्य भूतपूर्वाः प्राचार्याः)

जन्म
विजया दशमी
१९३८ वि.

निधनम्
पौष शुक्ल अष्टमी
२००६ वि.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वित्राश्शब्दाः

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

पाठक महाभागाः ! अद्यत्वे जन्मभूमेर्भारतवर्षस्योद्धाराऽपदेशेन यथा तदीयं पातनं धर्म्मपराङ्मुखत्वं वा वर्तमाननेतृभिः क्रियते, नैतन्निह्नुतं भवेच्छ्रीमतां दृग्गोचरात् । इमे कामं बाह्यदृष्टौ 'खद्दरा' दिपरिधानाद्याडम्बरप्रदर्शनेनैव भारतमातुः स्वच्छन्दताऽपदेशं प्रदर्शयेरन्, परन्तु यदा शरीरकष्टप्रदं किमपि कृत्यं कर्तुमापतेत् स्वदेशोद्धारनिमित्तम्, तदैते कङ्कणपरिधानं कृत्वा गृहे स्त्रीयिता एव तिष्ठन्ति । 'वचने का दरिद्रता' इत्यनुसृत्यैव 'वाचा शक्ता न कर्म्मणा' इत्येतन्निदर्शनायमाना इमे केवलं व्याख्यानदानद्वारैव देशमुद्दिधीर्षन्ति । परकीयक्षव- (नासाध्वनि) शब्दं श्रुत्वैव गव्यूतिं धावन्त इमे, व्याख्यानमञ्चमञ्चन्तः काष्ठपीठिकायां हस्तप्रहारेणैव स्वशौर्य्यं परिचाययन्ति । छदिषि विडाल-पतनशब्दं निशम्यैव समाश्रितवेपथवो नीशार (रजाई) वेष्टितमुखा इमे धर्म्मकृत्यविनाशन एव भारतीयसंस्कृतिविनाशकाऽऽन्दोलनप्रचारण एव वद्धपरिकराः स्ववीरतां परिचाययन्ति । जनान् विदेशे धनप्रेषणार्थं प्रतिषिध्य तेभ्यस्तद् गृहीत्वा वैदेशिकस्वविलाससामग्रीरादाय स्वयमेव विदेशे धनप्रेषणे कारणानि भूत्वा धन्यम्मन्या भवन्ति । पदातिदूरगमनन्तु दूराऽपेतम्, निकटतमस्थानोपढौकनेऽपि एषां कृते विविधयानानि भूयान् धनराशिश्चाऽपेक्ष्यते । यदि कश्चिद्धार्मिक एतेभ्यस्सदुपदेशं विश्राणयति, तर्हि त एतेन स्वापमानमवबुध्य तस्मै कोपरोपणं कुर्वन्ति, स्थाने स्थाने सभां कृत्वा तं मिथ्यालाञ्छनैस्तिरस्कुर्व्वते । एषां कार्य्य - परिपाटी तु— 'आरम्भगुर्वी क्षयिणी क्रमेण' भवति । हा ! किमयमेव देशोद्धारप्रकारः ? किमियमेव 'स्वराज्य' परिभाषा ? किमिदमेव देशभक्तिलक्षणम् ? हन्त !

अयि नेतारः ! ईदृग्विधैर्दुर्व्विलसितैस्तु भवन्तो भारतवर्षमवनतिसन्निकर्षमेव नेतारः । यदि भवन्तो वस्तुत एव देशमुद्दि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धीर्षव उन्निनीषवश्च सन्ति, सत्यं वा स्वराज्यमभिलाषुकास्सन्ति, तर्हि भवतां प्रथमङ्कर्त्तव्यमेतद् यद्–भवन्तो धर्म्मस्वातन्त्र्यं दवयितुं मा प्रयस्यन्तु । भवन्तो धर्म्मदृष्टिकोणेन स्वराज्यमधिरक्षितुं यतन्ताम्, नतु नीतिदृष्ट्या । भवतां धर्म्मस्यैवोन्नत्या, प्राचीनधर्म्मस्यैव स्थित्या देशस्योन्नतिः; नत्वीदृग्विधैर्व्वर्त्तमानदुश्चेष्टितैः । इतिहासपृष्ठानि पश्यन्तु । पुरातनानां स्वराज्यमीप्सूनांच चरितानि पर्य्यालोचयन्तु । तेषामाचरणैः स्वकीयाचरणानि तुलयन्तु । अन्येषां कथापथस्त्यज्यताम्—तत्र मेवाडाधिपतेर्नाकनायकीभूतस्य श्री प्रतापसिंहस्यैव वशीकारकारि–सदाचरणसरण्यां दृक्पातः पादपातो वा विधीयताम् । तेन महात्मना–'ये वर्षन्ति ते न गर्ज्जन्ति' इति सार्थक्यमानिन्ये, न भवतां राद्धान्तः 'ये गर्ज्जन्ति ते न वर्षन्ती'ति । तेन कीदृंशि कष्टानि सोढानि, कथ वा स्वार्थत्यागः कृतः । कथं वोपवासानामपि समादरः कृतः, अरण्ये वासोऽपि स्वीकृतः, जीवनस्य वलिरपि दत्तः, अन्तपर्य्यन्तमपि स्वीकृताद् व्रतादपेतता नाऽकारि । एतस्मादधिकं स्वधार्म्मिकस्वातन्त्र्यं नाऽपहारितम् । स देशभक्तौ जायमानमपमानमपि सम्मानमवाबुद्ध, भीरुतां तु सस्माराऽपि नैव, जनानां धनेन स्वविलाससामग्रीं न सञ्जिघृक्षाञ्चकार । असावन्यस्मात् सन्मतिं प्राप्य स्वाऽपमानं नैव मेने । गेहे नर्द्दिताञ्च नाऽशिश्रियत् तस्य द्वेष आसीद् विलासेन, नतु स्वप्राचीनधर्म्म - बन्धुभिः । तस्य प्रीतिरासीद् देशेन, न किल स्वदेशिकजन–धनेन । तच्चण्डकोदण्डस्य लक्ष्यमासन् विधर्म्मिणो न तु सधर्म्मिणः । इत्येवंविधस्य महात्मनश्चरित्राणि यदि प्रणिधानेनाऽनुकुर्य्युर्नेतारः, तर्हि योऽद्यत्वे देशोद्धारस्थाने देशाऽपकारो जायमानो निभाल्यते, स न स्यात् । अथ च सत्या देशभक्तिर्जागरूकतामापद्येत, तेन चास्मद्देशगौरवमपि जागृयात् ।

अस्तु—सन्तु नेतारः कुपथगामिनो ज्ञानाद्वा, अज्ञानाद् वा, अस्माकमकृतज्ञाः संस्कृतज्ञा एवाऽत्र किं कुर्व्वन्ति ? तेऽपि सदैव दैवपतिताः सुप्ता एव सन्ति । यदपोहनाय 'शिवाजी–प्रतापसिंह–गोविन्दसिंह–वीर बैरागी–' प्रभृतीनां चरितान्यधिकृत्य निर्म्मि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तानामुत्साहकानां संस्कृतकाव्यानां निर्म्माणस्य, तेषाञ्च संस्कृतज्ञमण्डले प्रचारणस्य च नितान्तमेव प्रयोजनीयता वर्त्तते येन संस्कृतप्रसार-व्याजेन धर्म्म-देश-भक्तेरपि प्रचारः स्यात् संस्कृतज्ञेषु। तत्र 'शिवाजी' चरितमधिकृत्य 'शिबराजविजयः' श्रीमदम्बिका-दत्त-व्यासमहोदयेन प्रणिन्ये; यत्र सुबहुसाफल्यमवाप्तं तत्प्रणेत्रा। एवमन्येषामपि काव्यानां नितान्तमपेक्षा वर्त्तते। तत्र 'प्रताप'—प्रतापमधिकृत्याऽपि कैश्चन काव्यानि प्रणीतानि स्युरिति सम्भाव्यमेव। परमस्मद्दृष्टिपथेऽधुना 'प्रताप'-प्रतापप्रख्यापकं प्रतापचरितं नाम काव्यं नव्यशैल्या प्रणीतं प्राप्तम्, यस्य प्रणेता नव्योत्साही 'डूण्डलोद' वास्तव्यः श्रीयुतमहावीरप्रसाद—जोशी साहित्याचार्यो वर्त्तते। इदं काव्यं प्रायो 'दोहा' च्छन्दोभिर्निबद्धं वर्त्तते। संस्कृते दोहा-कवित्तादिषु रचना प्रथमं मेदपाटीय-श्रीकृष्णरामभट्टकविना-यो जयपुरराजकीयसंस्कृतपाठशालायामायुर्व्वेदाऽध्यापक आसीत् प्रचालिता। तत इतो ध्यानं जयपुरसंस्कृतपाठशालायां साहित्याऽध्यापकस्य भट्टश्रीमथुरानाथशास्त्रिणः साहित्याचार्य्य—महोदयस्य प्राप्तम्। यत्फलस्वरूपे 'साहित्यवैभवं' प्रथितम्। ततोऽधुनाऽनेन नव्यभव्यकविनाऽपि पूर्व्वपण्डितगणक्षुण्णे वर्त्मनि प्रचलितुमुदसाहि। परीक्षापिशाच्या दुष्प्रभावाद् यदि कश्चिदुत्साही नव्यकाव्यं प्रकाशयति चेत्; परीक्षाग्रन्थपठनमात्रलुब्धानामौदासीन्यात् कोऽपि तज्जिघृक्षुर्नोदेति, (एषैव संस्कृत-समाचारपत्राणां कथा) एवञ्चोत्साहिनामुत्साहश्शीघ्रमेव नश्यति। परीक्षासु नव्यग्रन्थानां नियमनेऽपि काठिन्यम्भवति, यावद्विश्वविद्यालयीय—पुस्तकनियामकानां चाटुकारिता, तेभ्य उत्कोचप्रदानं, तदीयोदरपूर्त्तिः, तैस्सह सम्यक् परिचयश्च वा न भवेत्; तावन्नव्यकाव्यं तत्र न नियमयितुं शक्यते। तस्य काव्यस्याऽऽस्वादमन्ते उपजिह्विका—जिह्वा एव गृह्णन्ति। अत एवाऽद्यत्वे नवोदीयमानकवीनां न्यूनता भवति। परं 'कर्म्मण्येवाऽधिकारस्ते मा फलेषु कदाचन' इति मत्वा ये केऽपि नव्यकाव्योन्मेषे व्यग्रचेतस्कास्ते धन्यवादाऽर्हाः। तेष्वेवाऽयमस्माकं प्रेमपात्रं कविः। तेन यथाशक्ति काव्येऽस्मिन् रससञ्चारेण यमकाऽनुप्रास-श्लेषोत्प्रेक्षाऽपन्हुत्याद्यलङ्कार-निवेशनेन सहैवाऽन्तराऽ-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्तरा स्वकल्पनाशक्तिचमत्कारेणाऽपि कथावस्तु सजीवं कृतम्, 'नहि कवेरितिवृत्तमात्रनिर्व्वहणेनाऽऽत्मपदलाभः, इतिहासादेव तत्सिद्धेः' इति च सार्थकीकृतं व्यतिरेकेण। वर्ण्यवस्त्वपि यथेष्टं वर्णितम्, येन देशभक्तिर्नितरां हृदये पदं ददाति।

'दोहादि' च्छन्दस्सु समपादान्तेऽन्त्याऽनुप्रासो हठादाकृष्याऽपि स्थापनीयो भवतीति प्राचीनच्छन्दोभ्योऽत्र काठिन्यम्, कविना चाऽत्राऽपि साफल्यं प्राप्तम् प्रायोऽत्र हठादाकृष्टता न दृष्टा। यद्यपि क्वचित् २ कवित्तदोहादिच्छन्दस्सु अस्मन्मतेन लयभेदो दृश्यते. एवमन्यत्राऽपि स्यादेव त्रुटिः क्वचिदिति सम्भाव्यते; तथाऽपि मानुषकृतौ सर्व्वथा दोषाऽभाव एवाऽऽश्चर्य्यविषयः; स्खलनानां परमेशाऽतिरिक्त–जीवशेमुष्याऽविनाभाववत्वात्। अस्तु- विस्तरभिया काव्यस्याऽमुष्य कात्स्न्र्येन समालोचनामकृत्वैतदनुरुध्यते, यत् संस्कृतज्ञैरेत्र स्वयं नेतृत्वमादाय वैधेयाः+स्वविधया विधेयाः, तेषामेव देशभाषासम्बन्धन देशनेतृत्वे सत्यं स्वत्वम्। तेषाञ्चोचितमेतद्, यत्—ते वर्त्तमान—नेतॄणां×दुरुदर्कशालिकार्य्याण्यपसार्य्य ईदृशं कार्य्यक्रमं प्रकटयन्तु, येन वास्तविको दशोद्धारः स्यात्, अथचाऽस्मत्पूर्व्वजानां यशोराशिः क्षोरनीरनिधिनीरप्रतिस्पर्द्धी स्यात् कवयितुश्चान्तर्लक्ष्यं पूर्ण्णं स्यात्। किमनल्पजल्पनेनेति शम्।

निवेदकः—

दीनानाथ शर्म्मा शास्त्री सारस्वतः

+ वैधेयाः—मूर्खाः, विधेयाः–आज्ञाकारिणः, विधेयाःकर्त्तव्याः।

× नेतॄणाम्। 'नामी' तिदीर्घः,।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

❀ प्राक्कथनम् ❀

अयि प्राप्त-परम-प्रशस्तयः, संस्कृत-साहित्य-**नभोगभस्तयः,** सुधीवराः ! परिणति-विरसायामस्यां संसृति-प्रसृतौ येऽपि केचन वैभव-भासुर-समुच्छ्रय-सीमानमपि कदाचिदत्यजङ्गमुः; येषां च यशःपरिमलो विश्व-वाटिकायां समन्तात् प्रसरीसरीति स्म; येषां च गुणगौरव-गाथां गायन्ति स्म मुक्तकण्ठं कला-कलिताः कविजना विमल-यशो-विभा-सिता विभासिताश्च भारती-वैभवेन। अन्ततस्तेऽपि नहि किमप्यभिमतमुदर्क-सम्पर्कं कन्दलयन्ति स्म; अपितु पतनोन्मुखा एव बोभुवति। तेन 'पतनान्ताः समुच्छ्रयाः' इति सत्यं मन्वान एव निभाल्यते प्राय इतिहासजुषां विदुषां सिद्धान्तः।

अत एव च नाक-लोक-विभा-समानं विभासमानं भारती-भा-रतं भारतं सकलास्वपि कलासु पुरा परां सीमानमुपासीनमपि साम्प्रतं पतनपराकाष्ठां काष्ठासु प्रथयति; दुरित-दल-दलितेषु दशेष्वप्यधमतमां दुरन्तां दुर्दशां दर्शयति। यद्यपि केचन-नेतृत्वाभिम निनो विदधति बहिर्वल्गुफल्गु-प्रयासमदसीय-समुदये, किन्तु ते मूलमुन्मूल्य शाखास्सेवन्ते। विदेशीय-नेतृणामन्धानुयायिनस्ते सर्वप्रथमं धर्म-दलन एव स्व-पौरुषं प्रकटयन्ति। अस्तु, पाश्चात्य-शिक्षा-दीक्षिता यदि न स्मरन्ति प्राक्तनं गौरवम्, तर्हि मा स्मरन्तु; किन्तु हन्त ! क्षारनिक्षेपणमिव क्षते इदमपरं दुःखस्थानं यद्धन्याः संस्कृतज्ञ-मूर्धन्या अपि निज-प्राक्कालिक-परिचय-शून्याः 'कूप-मण्डूके' त्यादिभिः पदैरलमलङ्कृता लोचन-गोचरीचरीक्रियन्ते ❀।

यदि पूर्वज-चरिताऽऽलोचने क्षणमप्यक्षि निक्षिपेयुस्तर्हि बहुशो ज्योतिः-स्वरूपा अद्भुतस्फूर्तयो मूर्तयः पथि-प्रदर्शकतां प्रपद्येरन् विशङ्कट-धर्म-सङ्कटमयेऽपि समये।

तथापि महाराणा–प्रतापस्य चारुचरितं कस्य वा चतुरस्य चेतश्चाक–चक्य–चमत्कृतं न चर्कर्ति ? अस्य वीरवरस्यासीमं

❀ चरीक्रियन्ते = चर्करीतान्तस्य करोतेः कर्मणि लट्। यङन्तस्य तु चक्रियन्ते इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साहसम्, अलौकिकं शौर्यम्, अप्रतिमं धैर्यम्, अनुरूपं रूपम् अनुपमां सत्य-सन्धाञ्चानुभूय, निध्यायचकस्य न सहृदयस्य हृदयं भक्ति-रक्तं भवेत् ? कस्य न वा सुमनसो मानसं मोद-मेदुरितं स्यात् ? कस्य च लेखकस्य लेखनी रसखनी न जायेत ? के न वा प्रशंसा-मुखर-मुखास्सुधा-सध्रीचीनां + वाचां प्रसरेण महात्मान तमुपासीरन् ? अथवा, किमिव न भवतु, कण्ठोपकण्ठं प्रचरण-परायणेष्वपि प्राणेषु, प्रवर्तमानेऽपि च वपुषश्शोषे नहि धर्म-विरहित उपास्थित । न च दुःख-भिया यवनाधिपस्यानादृत्यो भृत्योऽबोभोत् । अशनायन्नेवगिरि-कन्दरास्वनवरतमाहिण्डमा-नोऽपि न मानं मुमोच, न वा च मानाय शिरो ननाम । यवन-सेनाभिरनुधावित उदन्यन्नेव क्षपाः क्षपयन्नपि न क्षमामजाहेत् × ।

विपद्वरीवृधा-विमनायमानोऽपि न नय-नैयून्यमस्प्राक्षीत् । अनुभूतचरीमवस्थां सास्मर्यमाणैर्मार्णवकैर्मेदुरित-खेदोऽपि न पराधीनतामुररी चकार । न च सन्धा-बन्धं शिथिली चकार । नहि तमुदासयति स्म नैष्फल्यं कर्मणाम् न च द्राघयन्ति स्म दुःखं विपत्तयः पर-पत्तयो वा, न वा वेपथुं प्रथयति स्म पतन-परा-काष्ठा, नहि कुहचनाऽपि एवंविध राजान्तरं शोश्रूयते स्म । न च सत्ययुगेऽप्येवंविधया सत्यसन्धया समभावि । अतः क्षिप्रमेव भामा-शाहकृतः परीवर्तः प्रावर्तिष्ट । विपत्तिश्शान्तिमशिश्रियत् । दुःखं च सेनावाप्ति-प्रमोदो व्यपोहति स्म । विकरालश्चारालोऽयं ⁄/ कालः क्वचिद् व्यलेष्ट । क्षण-क्षण-क्षण-*-लक्षणो रसमयस्समय-स्समुपक्रान्तः ।

+ सुधा-सध्रीचीनाम् । सह पूर्वादञ्चतेः 'ऋत्विक्' इत्यादिना क्विन् । सहस्य सध्रिः' 'अञ्चतेश्चोपसंख्यानम्' इति ङीप् । 'अच इत्यलोपः' चौ' इति दीर्घः ।

× अजाहेत् ईट् पक्षे रूपम् । अन्यत्र अजाहात् ।

⁄/ अरालः कुटिलः ।

* क्षण उत्सवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किन्तु 'चित्तहरा'+ऽनवाप्ति-खिन्नः स नापि सन्तोषमुपास्थित । न च स्वसन्धामजाहासीत् । ⊙

साम्प्रतं मेदपाटे ÷ तिहासविषयं लक्ष्यीकृत्यापि किंचित् कथनमिह नासाम्प्रतम् । महाराणा कुम्भो यदा मेदपाटसिंहासनमारुक्षत् तदा मेदपाटस्य सौभाग्य-सूर्यो मध्येनभो [] विचरन्नासामास । मालवगुर्जरादयो देशा राज्ञाऽनेन विजिता आसिषत । बहुधा यवन-नृपा वन्दीकृता विमुक्ताश्च । चित्तहरकीर्तिस्तम्भः प्रेष्ठं प्रमाणमर्पयति विजयस्यास्य । 'देहली' नर-पतिरपीमं 'हिन्दु-सुरत्राण'ममंस्त । ततश्चास्य तनयो रायमल्लो मेदपाटं शशास । अस्य समयेऽपि तत्र बहुधा जन्येनाऽजनि ।

अथ महाराणा सङ्ग्रामसिंहो १५६६ मिते वैक्रमे संवत्सरे सिंहासनमधितष्ठौ । अनेन युद्धे बहूनि नगराणि प्राप्सत । विश्वद्रचङ् विजयश्च तदानीं कृतः । इतिहास-भासुर-मतिभिर्विज्ञततिभिरभ्यधायि यत् तदानीमद्वितीयोऽप्रतिरथश्चावर्त्तताऽयं नरेशः । अस्य समये मेदपाटदेशः परां सीमानमानशे समुन्नतेः । किन्तु 'बाबर' नामा यवनस्तदानीं महत्या शक्त्या भारतं प्रापद्यत । भय-भूयिष्ठता चाबोभूवीत् । सर्वेऽपि राजानस्सङ्ग्रामसिंहाश्रयण एव सन्तोषं व्याञ्जिषुः । उदसाहयँश्चेमममितसेनासध्रीचीनाः । किन्तु स्वीयौदार्यस्वभावेन वञ्चनामवनीवचुर्भारतीया उपधिपरायणैर्यवनैः । तथापि सङ्ग्राम-सिंह-पराक्रमं प्रशशंसू रिपवोऽपि ।

इत एव मेदपाटस्य पतनकथया प्रारम्भि । संग्राम-सिंहतनयौ ज्येष्ठौ रत्नसिंहविक्रमादित्यौ ईर्ष्याद्वेषाभिवृतमानसाववर्तिषाताम् । अतः सङ्ग्रामसिंहानन्तरं प्रारम्भि गृहकलहेन । समयं समीक्ष्य च दासेरो वनवीरो राज्यासनमाचक्राम । निहतौ च बन्धू ।

+ चित्तहरः—चित्तौर ।

⊙ अजाहासीत् । यङ्लुकि लुङि रूपम् ।

÷ मेवाड ।

[] पारे मध्ये षष्ठ्या वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'पन्ना' दासी निजतनयं मृत्यवे समर्प्य ररक्ष कुमारमुदयसिंहम्। समये च तेनापि नृपति–पदमलम्भि। किन्तु विलासवासना-पराधीनोऽयं यवनैर्विजितस्तिरस्कृतश्च। मेदपाटसर्वस्वं च परतन्त्रता-पाशे प्रापप्तत्। अथ महाराणाप्रतापेन पुनः कथमपि प्रयत्नोऽकारि। तदुद्यमे च सफलता समवापि। किन्तु प्रतापेन बहुधा समुदैरि– "यदि महाराणासङ्ग्रामसिंहस्य तनयोऽहं बोभूयां तर्हि मातृभूमिः पराधीनतां न प्रपद्येत।" किन्तु विलासिनोदयसिंहेन सर्वं स्वाहा कृतम्।

अस्तु, एवंविधस्यैव महात्मनः प्रतापस्य चरित्रं चित्रयितुं दुस्साहसो विधीयतेऽकिञ्चनेनानेन जनेन। तच्च चरितं खण्ड-काव्यरूपे पुरा 'सस्कृत रत्नाकर' नाम्नि संस्कृतसाहित्यसम्मेल-नस्य मासिके मुखपत्रे क्रमशः प्रकाशितं साम्प्रतं पुस्तकाकारे प्रकाश्यते। काव्येऽस्मिन्कथा प्रायः साधारणतयैव वर्णिता-इतीमं मन्तुं क्षन्तु मर्हन्ति भवन्तः। काव्यस्यास्य भूमिका भारत-प्रसिद्ध-वैदुष्यैरनवद्यगद्यपद्यलेखकैर्मुलतानस्थ - संस्कृत - महाविद्यालयस्य तथा देहलीस्थ सं० हि० महाविद्यालयस्य च भूतपूर्वैः प्रधानाध्यापकैः पण्डित श्रीदीनानाथ शास्त्रिभिर्लिखिता इति कृतज्ञोऽस्मि। शार्दूल-पुरस्थ - मोहता - आयुर्वेद - महाविद्यालय - प्राचार्यैः श्री वासुदेव शास्त्रिभिः प्रूफसंशोधन-साहाय्यदानेन तथा पूर्वोक्त महाविद्या-लय - विवेचकैः श्रीचन्द्रभानुशर्मभिः प्रतिलिपिकरण - सहयोगेन-चोपकृतोऽस्मि।

आशास्यते हि इमां वाङ्मयीं पूजामधिगम्य प्रसादमुपसेदिवानन्तरात्मा प्रतापस्य कालिमानं मार्क्ष्यति लेखन्याः। संस्कृतज्ञा विज्ञाश्च विनोदोपनोदिताः प्रताप–संस्तुतास्सन्तोषमाश्रयिष्यन्तीति कृतं कृतिषु कृतिनिर्देशेन।

विनीतो

महावीर प्रसादः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रताप - चरितम्

[खण्ड - काव्यम्]

प्रथमस्सर्गः

मङ्गलम्

एकरदनमिभवदनं, मदनार्दन-नन्दनं धियः सदनम् ।
कविनायकमिन्दीवर - नयनं वन्दे विनायकं देवम् ॥१॥

अनय-विनयनं, जयनं, विकचकुशेशय-शयंश्रिया अयनम् ।
विनयनयनमिभनयनं, त्रिनयन - तनयं विनायकं वन्दे ॥२॥

जयति जनकजा-जानि,-र्जित-निर्जर-राजारि-राजिराजौ ।
निजरत-जन-जीवातु,-र्नव-जलधर-जाल-जित्वर-ज्योतिः ॥३॥

चिन्तयामि चरणौ चिरं चिन्मय पुरुषपुराण !
सन्ततमाशीराशिभिः स्वजनं समनुगृहाण ॥४॥

वाणीं वीणाक्वणरतां धृतकमलामधिपाणि ।
सुमनः - सुमनः - सेवितां मनसि मुदा करवाणि ॥५॥

भयहरणं भरणंमतेर्ममान्तः करणगामि ।
कलाविशारद - शारदा - चरणं शरणं यामि ॥६॥

---

१. इभो गजः । मदनार्दनः शिवः । आर्यावृत्तम्

२. विनयनमपनयनम् । कुशेशयं कमलम् ।

३. आजौ संग्रामे । जीवातुर्जीवनौषधम् जेताजिष्णुश्च जित्वरः । ज्योति-रग्नौ दिवाकरे इत्यमरः :

४. चिन्मयः पुराणपुरुषः सम्बोध्यते । दोहाच्छन्दः ।

५. धृतकमलामधिपाणि करे = कमलधारिणीं लक्ष्मीधारिणीं च । अर्थात् यत्सेवनेनाऽनायासमेव जनो लक्ष्मीमधिगच्छति । अतः लक्ष्मीं करे धारयतीव । सुमना विदुषि देवेच ।

६. अन्तः करणगामित्वाच्छरणागतिः सुलभा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भव्यभारती - वैभवे स्वान्तं शान्तिं यातु ।
सुविस-विशद-वसना मनसि हास-भासुरा भातु ॥७॥

गैर्व्वाणी - वाणी - प्रवर - वर्ण - वर्णिता भाति ।
गर्ज दर्जुनगौरवं या कवये प्रददाति ॥८॥

सकलकामधुक् सुरगवी यस्य गृहे वर्वर्ति ।
अजा - पयः पान - स्पृहां मनसि स मुधा बिभर्ति ॥९॥

स्वान्तं सुखमेति क्वचिन्नहि सुरगिरं विहाय ।
न तु मराल-मानस-रति र्भुवि मानस मपहाय ॥१०॥

लेखनीम्प्रति

लेखनि! विरम विषाकरात्, कच-कुच-विषयादाशु ।
भवतु च ते रचनारतिर्भारत - विभव - विभासु ॥११॥

गुणिगण-गाथा-गीतिभि-र्गुरुतां किमु न दधासि ।
मुखं कालिमाऽऽकुलमलं किमु न कलं विदधासि ॥१२॥

कथमकाण्ड - ताण्डव - रते ! शृङ्गारं सर्स्मर्षि ।
किमु न चण्डभुजदण्डयोर्वर्णनबलं विभर्षि ॥१३॥

---

७. बिसं कमलम् । भासुरा भास्वती ।

८. वर्णो द्विजादावक्षरे च । धवलोऽर्जुनः इत्यमरः ।

९. कामधेनु-दुग्ध-रसिकस्याजा-पयः पानेच्छा नैव संभाव्यते ।

१०. मानसं चित्तं सरश्च । मानसं स्वान्तसरसोरित्यमरः ।

११. आकरः खनिः ।

१२. कालिम्ना आकुलमिति विग्रहः । कलं सुन्दरम् ।

१३. सर्स्मर्षि । रुकि ईडभावे (यङ् लुकि) स्वरूपम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निःशेषक्लेशे कथं देशे लेशतयैव ।
शौर्यसङ्कुले वा कुले प्रभविष्यसि ह्रियैव ॥१४॥

न हि साहित्ये संहिता न च लक्षण-दक्षाऽसि ।
नाऽलङ्काराऽलङ्कृता च्छन्दसि मन्दतराऽसि ॥१५॥

कल्पवल्लरीं कोमलां किमु कामयसे तेन ।
स्वगमन्तरा दुर्गमां क्रष्टुं भुवि हस्तेन ॥१६॥

परं शारदा-सेविके ! कवि-प्रसाद-वशेन ।
गुरुवर्गैरनुकम्पिता भव पूरिता रसेन ॥१७॥

मेदपाट-महिमानमयि ! वर्णय सुतरामत्र ।
प्रतापस्य विस्तारय प्रतापमपि सर्वत्र ॥१८॥

घोषयन्तु दोषान् द्विषो रोषाददो निरोक्ष्य ।
यान्तु च गुणिनो गौरवं सद्गुणगणं समीक्ष्य ॥१९॥

किन्तु यथार्थ-विवेचकान् प्रार्थयेऽपि मुदितोऽत्र ।
मणीरत्नविद्वीक्षितो मानमेति सर्वत्र ॥२०॥

---

१४. शृङ्गाररसिकाया देशभक्तौ प्रवृत्तिः सन्देहकरी । ह्रिया लज्जयैव । विफल-प्रयत्न-परत्वाल्लज्जोद्गमः ।

१५. अप्रवृत्तौ कारणानि ।

१६. असम्भाव्यता व्यज्यते ।

१७. प्रोत्साहनम्

१८. मेदपाट :— मेवाड़ इतिख्यातः ।

१९. अदः— प्रतापचरितं नाम काव्यम् ।

२०. मणी रत्नविद् - इत्यत्र ढूलोप दीर्घः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ प्रस्तुतम् ।

चकास्ति वर्षं भारतं भुवो भूषणं नाम ।
भाविक - वैभव - भासुरं धर्मधान्य - धनधाम ।।२१।।

सदा सदम्भःस्थितिरलं जड़धिर्नीचो वाऽति ।
यस्य चरण-चरणव्रतो रत्नाकरतां याति ।।२२।।

कथं नावहेलामतः सुरपुरमप्युपयातु ।
सर्वे तत्र विमानिनो नात्र विमानी जातु ।।२३।।

कुले कुलेऽत्र कलाधराः गृहे गृहे च सुधाऽस्ति ।
श्रीश्रित - दामोदर - गणः पुरि पुरि यत्र चकास्ति ।।२४।।

विविधा विबुधाः पथि पथि च गुरवो गणे गणेऽपि ।
सेनान्यः प्रचकासति च यत्र हि रणे रणेऽपि ।।२५।।

लसद्बहुललाटास्पदं सुधी - मुखमिवोद्भासि ।
सदा सुदर्शन - मोहनं हरिकर - लीलालासि ।।२६।।

---

२१. भाविकम् - वास्तविकम् ।

२२. जड़धिः– जलधिः । 'यमकश्लेषचित्रपु बवयोर्डलयोर्नभित्' । अन्यत्र जडाधीयन्तेऽस्मिन्निति तस्याधमता सूच्यते । सतोऽम्मसः स्थितिर्यत्रेति पक्षे च स दम्भस्थितिरितिच्छेदः । 'नानुस्वारविसर्गौ च चित्रभंगाय सम्मतौ' 'चित्रभङ्ग' मित्युपलक्षणम् ।

२३. विमानिनो विमानवन्तः । विमानी - विगतमानः ।

२४. कलाधराः– पंडिताः, चन्द्रश्च । सुधासौधलेपोऽमृतं च । श्रीः शोभा लक्ष्मीश्च । दामोदरो मालाधारी विष्णुश्च ।

२५. विबुधो विद्वान् देवश्च । गुरुराचार्यो वाक्पतिश्च । सेनानी सेनापतिः कार्तिकेयश्च ।

२६. बहुल-लाटास्पदं, बहु ललाटास्पदमितिच्छेदः । सु-दर्शनं सुदर्शनमिति च । हरिः सूर्यः विष्णुश्च करो मरीचिः पाणिश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् सुमनः सुमनः श्रितं, महितमहो ! महसाऽपि ।
नाकलोकमालोकते न घृणा - स्पृशाद्दृशाऽपि ॥२७॥

गङ्गावारि - निवारितं यत्र न दुरितमुदेति ।
यत् सुविपुलकरभाचितं रविमण्डलरुचमेति ॥२८॥

वर्णाच्युतिः प्रहेलिका - बन्धेष्वेव विभाति ।
स्रोत एव सरितामहो मर्यादामतियाति ॥२९॥

यत्र कम्पता लक्ष्यते पादपपर्णेष्वेव ।
कम्रत्वेऽपि कठोरता भाति सुवर्णेष्वेव ॥३०॥

अत्र मेदपाटश्शुभोद्देशो देशो भाति ।
लोकाऽलङ्कारो हि यो लङ्कां न्यग् विदधाति ॥३१॥

नागर - निचितं 'चित्तहर' नगरं तत्रोदेति ।
रुचिर - रत्न - रुचि - रोचितं सागर - गुरुतामेति ॥३२॥

---

२७. एवं विधमपि नाकलोकं यत् घृणास्पृशाद्दृशाऽपि नालोकते इत्याश्चर्यार्थे अहो !

२८. करभाचितं किरणकान्ति व्याप्तमिति-रविमण्डलपक्षे । देशपक्षे करभव्याप्तमिति ।

२९. ब्राह्मणादिभ्यो वर्णेभ्यः कस्यचिच्च्युतिर्न भवति । न वा केचन प्राचीनां मर्यादामतिक्रमन्ति ।

३०. कस्मिंश्चिदपि भयेन कम्पनशीलता न लक्ष्यते । कमनीयस्य च कस्यचित् कठोरता नानुभूता । लोके इतिभावः । सुवर्णेषु कनकेषु ।

३१. शुभोद्देशः– सुन्दर-प्रदेशः । लङ्काव्यतिरेकः सौन्दर्येण सुरक्षितत्वेन च । मेदपाटः 'मेवाड़' इतिख्यातः ।

३२. चित्तहरः– 'चित्तौर' इति विदितः । नागर-निचितत्वेन चतुराणां प्राचुर्यं द्योत्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नगरीयं न गरीयसी नग - रचिता भुविकस्य ।
सज्जननीतिरनीतिका जननी वीरजनस्य ॥३३॥

यत्र विचित्राश्चित्रिताः प्रासादाः प्रविभान्ति ।
द्योवनिता - वदनं विधुं चुम्बितुमिव संयान्ति ॥३४॥

शिखर-विराजित - कनक-कल-कलशः करनिकरेण ।
किरणमालिनं योजयति जिह्रीया - प्रसरेण ॥३५॥

परा पताका कम्पते सदन - शिरसि सर्वत्र ।
मन्दस्रोत इवालसति मन्दाकिन्या यत्र ॥३६॥

यत्र चित्र-चित्रित - सुधा - वृत-वलभी - भवनानि ।
चित्रयन्ति शरदिव मनः सान्ध्यजलद - बिम्बानि ॥३७॥

यत्र निकेतन - केतनो मन्दं मन्दं वाति ।
श्रित-विमान-सुरबालिका-श्रमः स्थितिं विजहाति ॥३८॥

भवनविराजितभामिनी - वरवदनं निध्याय ।
दिने चकोरा श्चित्रिता विधुरिति मनसि निधाय ॥३९॥

---

३३. नगैर्गिरिभी रचिता इयं नगरी कस्य न श्रद्धेया । सज्जननीतिः— सती जनानां नीतिर्यत्र, अनीतिका ईति-वर्जिता ।

३४. द्योवनितावदनरूपविधु - चुम्बनेन प्रासादानामौन्नत्यं व्यज्यते ।

३५. जिह्रीया-लज्जा । कनक - कलशादिवर्णनेन नागरिकाणां समृद्ध्य-तिशयो व्यज्यते ।

३६. कम्पते-राजति । मन्दाकिनी-मन्दस्रोतस्तुलनयाऽनुपम-सौन्दर्य व्यक्तिः ।

३७. वलभीभवनानि - अट्टालिका गृहाणि चित्रितत्वेन सुधावृतत्वेन च मनश्चित्रयन्ति । शरदि सन्ध्याजलदबिम्बानीव - भासमानानीत्यर्थः । व इवार्थे प्रयुक्तः ।

३८. यत्रत्य भवनध्वजो विमाने विचरन्तीनां सुरबालानां श्रमं हरति । भवनानामौन्नत्यध्वनिः ।

३९. चकोरभ्रान्तिजननोक्त्या सौन्दर्यातिशयः सुन्दरीणां ध्वन्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत्र वलभ्यां युवगणः सुमनः स्रजं बिभर्ति ।
पातुमलं मधुपः सुधां विधुं ततः सरिसर्ति ॥४०॥

यत्र च पथि जगतीजटितमणयो महसा भान्ति ।
गगन-मुकुर-बिम्बित-विभास्तारा-संज्ञां यान्ति ॥४१॥

यत्र दण्ड्यता वर्णिषु भ्रान्तिर्भ्रमरचयेषु ।
नारीणां परकीयता लक्ष्यते च काव्येषु ॥४२॥

यत्र च जीवनविरहितः शारदनीरद एव ।
मदलेखा-संस्तुतमतिर्वृत्त-विशारद एव ॥४३॥

मानसे च सन्मानसे कमलं यत्र विभाति ।
कुहूश्च बृहती निम्नगा तिमिरचिताभां याति ॥४४॥

यत्र सद्म भासित-नयं भात्यधिकारिमनश्च ।
कान्ता-रोचित-वैभवः कामी सुमुनि-जनश्च ॥४५॥

---

४०. अट्टालिका-स्थितानां तरुणानां मालास्थिता मधुकराः सन्निकटतया चन्द्रंप्राप्य तत्सुधां पिबन्तीति प्रासादानामौन्नत्यातिशयो व्यज्यते ।

४१. घण्टापथेषु महीखचितमणीनां प्रतिबिम्बभूता एव तारका इत्येवं समृद्ध्यतिशयध्वनिः ।

४२. ब्रह्मचारिष्वेव पलाशादिदण्डधारणेन दण्डार्हता । न कस्यचित् पौरजनस्य राजदण्डभाजनता । परकीया नायिकाश्च काव्येष्वेव । न च याथार्थ्येन ।

४३. जीवनं जलम् । प्राणधारणं च । मदलेखा अभिमानरेखा । पक्षे उष्णिग्जातौ पंचविंशछन्दः ।

४४. कम्-अलम्, अत्यर्थं सुखमित्यर्थस्सुजनमानसपक्षे मानसपक्षे कमलमरविन्दम् । कुहूः अमा तिमिरचिताभाम्-अन्धकारव्याप्ति याति । निम्नगापक्षे च तिमिर्जलचरः ।

४५. सद्मपक्षे भासि-तनयमितिच्छेदः । अधिकारिमनः पक्षे च भासितनयमिति । कामिपक्षे कान्तयारोचितं वैभवं यस्य । मुनिपक्षे-कान्तारं वनम् । तदुचितवैभवः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत्र पण्यगणमापणावगणितमणीन् बिभर्ति ।
नागलोकमपि चित्रितं चिरं तिरश्चरिर्कति ।।४६।।

नरपति - नीतिनिचयेषु निपुणो नितान्तं
दयाक्षमा - शौर्य - धैर्यगाम्भीर्य - गुणाकरः ।
प्रताप - प्रतापितप्रवर - परिपन्थिपुञ्जः
प्रभाकरप्रभवान्वयाम्बुज - प्रभाकरः ।।
सन्ततं संयमश्रद्धासुखसत्यसिद्धिशीलो,
वीरबाप्पावंशभूषा सौजन्यसुधाकरः ।
प्रीतिप्राज्यराज्यमत्र श्रीयुतस्संग्रामसिंहो
विदधौ सुकविकुलपिक - कुसुमाकरः ।।४७।।

रिपुनारी - नयनाञ्जनं मसिवदसितमादाय ।
कीर्तिरलक्ष्यवलक्षतां यस्य न किंचिदियाय ।।४८।।

वसुधामवति सुधामवति धर्मो धृतिम्बभार ।
कलिकालेऽपि कृतं युगं तत्र स्थितिं चकार ।।४९।।

यो गुण - गण - मणि - रोहणः कला-कलानिधिरेव ।
कीर्ति - सुरनदीहिमगिरिः सुकवि-भाग्य-विधिरेव ।।५०।।

---

४६. समृद्ध्यतिशयो व्यज्यते ।

४७. परिपन्थिपुञ्जः– शत्रुसमूहः । प्रभाकरेत्यादिः सूर्यवंशकमलसूर्यः । प्रीतिप्राज्य-राज्यम् । प्रेम्णा प्रशासितं राज्यम् । घनाक्षरीच्छन्दः

४८. मसिवद् असितंकृष्णमञ्जनमादायाऽपि यस्य कीर्तिः शुक्लतां न तत्याज । वलक्षो धवलः ।

४९. सुधामवति तेजस्विनि राजनि वसुधामवति महीं पालयतिसतीत्यर्थः ।

५०. रोहणः– विद्रुमोत्पादनो गिरिः । कलानिधिर्विज्ञश्चन्द्रश्च । कवि-भाग्य - विधाता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शौर्य - हंस - शरदागमो जडता - निशारविश्च ।
मानमौक्तिकाम्भोनिधिर्मोहमहीध्रपविश्च ॥५१॥

प्रमदकलङ्कान्तं मनः करिकुलं च सुबभार ।
मुखं च हयमुच्चैःश्रवः - सुन्दरमलं दधार ॥५२॥

येन कला - कलिकायशः - कुसुम - मधुपताऽवापि ।
नयशोभाजनताऽरिभिः प्राप्ता सा तेनाऽपि ॥५३॥

यश्च विक्रमे विक्रमो मान्यो मानि - मनस्सु ।
दण्डधरो रिपुमण्डले, सश्रीकस्सुमनस्सु ॥५४॥

अर्थिजनश्चाश्रित्य यं सपदि सफलतामाप ।
चिन्तामणिरिति चिन्तया पाषाणतामवाप ॥५५॥

सदसि विविध - विबुधावृतः सुरपतिरुचं बभार ।
किन्तु गोत्रपक्षच्छिदां गोत्रायो न चकार ॥५६॥

---

५१ शरदागमे हंसाः प्रसादमासादयन्ति । महीध्रः पर्वतः । पविर्वज्रम् ।

५२. प्रमदस्य-प्रकृष्टमदस्य कलङ्कस्यचान्तो यत्र तन्मनः । प्रमदकलम् मद-गर्भम् । कान्तं च करिकुलं । उच्चैः श्रवःसुन्दरम् उन्नत - कर्णतया सुन्दरम् इन्द्राश्वसुन्दरं च ।

५३. येन कला-रसज्ञताऽवापि नय-शोभा जनता च प्रापि । अरिपक्षे । न यशो-भाजनता, अकीर्तिभाजनता इतिभावः ।

५४. यः किल पराक्रमे विक्रमादित्यसमः । शत्रुमण्डले दण्डधरः– दमन-शीलो यमो वा । सश्रीक इत्यत्र शेषे विभाषेति कप् । 'नद्यृश्च' इति तु न । 'नेयङुवम्' इति नदीत्वनिषेधात् ।

५५. याचकजनो हि तस्य राज्ञ आश्रयेण सद्य एव स्वमनोरथान् साधयतीति हेतोश्चिन्तामणेश्चिन्तया पाषाणता - प्राप्तिरित्युत्प्रेक्ष्यते । तन्महत्व विनाश-संभव-प्रसङ्गात् ।

५६. विविधविबुधावृतत्वेन सुरपतिशोभाऽऽश्रयणम् । विबुधा देवा पंडि-ताश्च । किन्तु यथा सुरपतिः गोत्रपक्षच्छिदां पर्वत-पक्ष-च्छेदनं विदधौ तथाऽयं न स्ववंशपक्षच्छिदां चकार । गोत्रम्, अन्वयः । गोत्रायः- पृथ्वीपतिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्षतिस्म कामं घनः समये तन्नगरेषु ।
अन्यदा त्ववाप स्थितिं रिपुनारीनयनेषु ॥५७॥

सकलकामनापूर्तिकर – कल्पपादपेनापि ।
तस्य वदान्यमहीपतेर्ध्रुवं शिष्यताऽवापि ॥५८॥

तस्य सपत्नानां रणे किमु सुखकारणमत्र ।
तच्चरणं मरणं विना शरणं नाऽप्यन्यत्र ॥५९॥

मरुसर इव रजसान्वितं चित्तमपापं यस्य ।
कथं कीर्तनीयः स भुवि भवतु न सुकविजनस्य ॥६०॥

तात्कालिकसत्कविजनः कीर्तिं कवयामास ।
ऋतुच्छलात्तद्वीरतामपि सुवर्णयामास ॥६१॥

नेयं विद्युल्लसति घनागमे गगनतले,
किन्तुशोक - प्रक्षिप्ताः स्वर्णालङ्कारा भासन्ते ।
नहि नीलाम्बरमेतत् परन्त्वतिशोक - चिन्ह,
नीलाम्बर - धारणेन स्वदुःखं प्रकाशन्ते ॥
चतुरचातक ! कथं नारीजन - विप्रलापे,
घनगर्जनभ्रान्तस्य पश्यामो विलासन्ते ।
श्रीयुत संग्रामसिंहहतद्विषदश्रुधाराः,
प्रेक्ष्य कल्पसे किं नीरदधाराः प्रभासन्ते ॥६२॥

---

५७ अनेन तस्य देशे सुवृष्टिः शत्रूणामत्यन्ताभावश्च सूच्यते ।

५८ महीपतिशिष्यत्वाङ्गीकारमन्तरेण कुतः कल्पपादपस्य कामनापूर्तिकारकत्वं सम्भाव्यताम् ।

५९. संग्रामसिंहशत्रूणां रणे तस्य चरणं मरणं च वा विनाऽन्यत्र शरणमेव न ।

६०. रजसा-गुणेन धूलिना च । अपगता आपो जलानि यस्मात्तन्मरुसरः । पापरहितं च चित्तम् ।

६१. तात्कालिकैः कविजनैर्यथा तद्वर्णनं कृतं तत्प्रकारोऽधस्तान्निरूप्यते ।

६२. अत्र चातकान्योक्त्या वर्षावर्णनपूर्वकं राजस्तुतिः । आकाशवस्त्रयोरम्बर - पद - प्रयोगः । धनाक्षरीच्छन्दः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चञ्चल चकोर ! स्पष्टमपि वीक्ष्य सुवदनं,
शारदेन्दुरयमिति भ्रान्तिमीरयसे किम् ।
नापि भ्रमरालिः किन्तु विकच - कचावलीय,
मञ्जुषु सरोजराजिसंशयमयसे किम् ॥
दिव्यदेहद्युतिः स्फुटं न मरालमालिकेयं,
शाटिकामपि काशश्रेणीं विचारयसे किम् ।
श्रीयुत - संग्रामसिंह - कीर्तिकामनीयं भाति,
तामपि शारद - सुषमां विभावयसे किम् ॥६३॥

नेदं मलिनं पङ्कजं रिपुनारी - मुखमस्ति ।
हेमन्तो नायं नृप - द्विषदन्तः स्फुटमस्ति ॥६४॥

नार्जितार्जुनं हिममिदं यशोऽदसीयं भाति ।
अरिवनिताश्रुजलं च वा, शिशिरे घनतां याति ॥६५॥

प्रमुदितमुखं कथं फुल्लपङ्कजं मन्यसे
नायं समीरः किन्तु स्वदेहं सुवासयते ।
कर्णाऽलङ्कारेऽपि हन्त! रसालमंजरी - भ्रान्तिः,
भृङ्गगुञ्जनं न किन्तु रसनां ध्वनयते ॥
मा विधेहि पराग इति मनीषामङ्गरागे
कौशेयदुकूले कः कुसुम-भ्रममयते ।
नायं वसन्तः परन्तु स्वनाथ-संग्रामसिंह-
विनोदाय देहं भूनिभामिनी भूषयते ॥६६॥

---

६३. अत्र च चकोरान्योक्त्या शरदृतुवर्णन - पुरस्सरं राजस्तुतिः । विकचा विकसिता कचावली केशपंक्तिरियम् ।

६४. अत्र हेमन्तमुखेन राजस्तुतिः । दोहाच्छन्दः ।

६५. अत्र च शिशिरद्वारेण ।

६६. अत्र च बसन्तवर्णन - पुरस्सरम् । घनाक्षरीच्छन्दः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शेषफूत्कृतिर्न हि न हर-नयनं दृष्टि याति ।
नायं ग्रीष्मश्चित्तहर-नृप-प्रतापो भाति ॥६७॥

श्रित-सुवर्ण-रचनैः सुकवि-जनैरेवमश्लोकि ।
सतु सुवर्णममितं तदा वितरन्नेवाऽलोकि ॥६८॥

बहुवारं यवनाधिपस्तद्भुवमाचक्राम ।
पर पराजयमन्तरा किमपि न समधिजगाम ॥६९॥

प्रहितास्ततः ससैनिकाः महाभटा यवनेन ।
तैरयोधि सह नृपतिना मेघैरिव पवनेन ॥७०॥

रणरचनाचणवृत्तिना शत्रुबलं जित्वाऽपि ।
तेन पुरन्दर— पुरवर—- प्राघुणिकत्वमवापि ॥७१॥

तदासनं तस्यात्मजो विक्रमजित् समवाप ।
किन्तु मेदपाटस्तदा दिष्टमनिष्टं प्राप ॥७२॥

वनबीरो दासेरकस्तं सुप्तं निजघान ।
पतितः पतितुं निजकरैर्गर्तमलं निचखान ॥७३॥

पापः पापपथात् पदं न निवर्तयांचकार ।
शिशोरुदयसिंहस्य यन्मृत्युं मनसि बभार ॥७४॥

---

६७. अत्र ग्रीष्मस्य । दोहाच्छन्दः ।

६८. सुवर्णः सुन्दरोऽक्षरः । तृतीयपादे च सुवर्णं कनकम् । कविजनेभ्योऽमितं अतुलं सुवर्णं वितरन्नेवायं नृपो जनैरलोकि ।

६९. मेदपाटाक्रमणे यवनानां पराजयस्यैव लाभोऽभूत् ।

७०. यवनेन 'बाबर' नामकेन ।

७१. पुरन्दर स्वर्गः । प्राघुणिकोऽतिथिः । स्वर्गतः इत्यर्थः ।

७२. दिष्टं भाग्यं समयं वा ।

७३. पतितो वनवीरः ।

७४. पापः- वनवीरः । पापपथात् पापमार्गात् । उदयसिंहः संग्रामसिंहस्य कनिष्ठस्तनयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयः सर्गः

दलति दुरन्तं दुरितमलं माधव - संस्मरणम् ।
यथा प्रकाशस्तिमिरं ज्ञानविकासोमरणम् ।।
यथा मारुतः सुविस्तृतां सघनां घनमालाम् ।
नीरासारो यथा बालुकारचितां शालाम् ।।१।।

मेदपाट - सिंहासनेऽद्य राजति वनवीरः ।
नाना रत्न - विभूषित - वेशो वज्र - शरीरः ।।
प्रबल - वासना - भासित - मतिरतिकुटिल - विचारः ।
हत - विक्रमोऽपि विक्रम - साधित - पाप - प्रचारः ।।२।।

आर्य - धर्मदीपोऽनय - वात्याहतो विनष्टः ।
हन्त ! सभ्यतावृतोऽपि नृत्यति पापः स्पष्टः ।।
शोषमशेषं गता सुकृत - तटिनी बत ! दूना ।
म्लाना श्रद्धा - लता विपुल - वासना - विलूना ।।३।।

मेदपाट - दुर्दशा - दर्शनाऽक्षम इव यातः ।
गगने लयं सलज्जः सूर्यो विभा - विभातः ।।
जगत्तमिस्रा शास्ति मोह - वैभव - निर्मात्री ।
राज - मन्दिरे चिन्तिताऽद्य बत ! पन्नाधात्री ।।४।।

---

१. अलमत्यर्थम् । नीरासारो - नीरं जलम् । आसारो धारा - सम्पातः । रोलाच्छन्दः ।

२. विक्रमः संग्रामसिंह - तनये बले च । पापस्य पकारे 'प्रेहे्वा' इत्यनेन लघुत्वम् ।

३. दूना - सन्तापिता । विलूना - च्छिन्ना ।

४. सूर्यास्तेन देशदुर्दशा - दर्शनाऽक्षमत्वमुत्प्रेक्ष्यते । संग्रामसिंहस्य कनिष्ठस्तनय उदयसिंहस्तस्य पालन-पोषण-रताऽभिभाविका धात्री पन्ना ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदय - सिंहहत्योद्देशं वनबीरं ज्ञात्वा ।
तत्र रक्षणाऽक्षमां स्वकीयां शक्तिंध्यात्वा ।।
पन्ना चिन्तयतीह विषण्णा चारु - चरित्रा ।
श्रद्धा - विमला, मैत्री - मधुरा, भक्ति - पवित्रा ।।५।।

हन्त ! दुरन्ता दुष्ट दिष्ट ! तेऽनिष्टा दृष्टिः ।
यन्मङ्गल - महोत्सवेऽप्यघटित - घटना - सृष्टिः ।।
यावत्कलिका सुरभिता न सुविकासं याता ।
तावल्लतिकाऽङ्गादपकृष्य जनेनाऽऽघ्राता ।।६।।

मसृण - कोमलस्तरु - नवाङ्कुरः स्फुटति न यावत् ।
झञ्झावाताऽऽहतो लीयते निमिषे तावत् ।।
सुकुमारः शुकशिशुः शब्दमनुसरति न यावत् ।
पतति श्येनः पिशिताशनो हि सहसा तावत् ।।७।।

भवति कोमलं कान्तं कुसुमं सुषमापूर्णम् ।
किन्तु कण्टकाकुलमिति चेतो व्यथयति तूर्णम् ।।
मानवजीवनमहो ! भवति कियदिव सुकुमारम् ।
किन्तु - कपट - पटवृतं विकटकौटिल्याकारम् ।।८।।

---

५. दासेरको वनवीरस्तु विक्रमं ज्येष्ठं तनयं च्छलेन निहत्य राज्यमकण्टकं कर्तुमना उदयसिंहमपि हन्तुं कृतनिश्चय आसीदेतदेव धात्र्याश्चिन्तायाः कारणम् ।

६. दिष्टम् - दैवम् । दिष्टस्य दुष्टस्यानिष्टा दृष्टिः सोत्प्रासं वर्णिता ।

७. झञ्झावातस्तीव्रः प्रावृडनिलः । पिशिताशनो मांस - भोजी । श्येनः शशादनः । 'बाज' इति ख्यातः ।

८. मानव - जीवनमपि कुसुमवत्कोमलं भवति किन्तु कष्टकाञ्चितमिति दुःखस्थानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हन्त ! मानवोऽसूयाद्वेष - विभावित - चित्तः ।
पाशं परनाशाय कल्पयति सञ्चित - वित्तः ॥
जनः स्वकृत्यैरेव भवति देवो वा दनुजः ।
स्वर्ग - निरय - रचना - विस्तारे प्रभवति मनुजः ॥९॥

विकच - कमल - कानने समुन्मद - गजप्रवेशः ।
अस्त-सौख्य-सूर्यः सम्प्रति घनतिमिरो देशः ॥
भाग्य-नभसि समुदितो धूमकेतुर्विकरालः ।
प्रात.काले हन्त ! दृश्यते सायङ्कालः ॥१०॥

लुण्ठ्यन्ते पथि पान्थाः पुरि सन्तो हन्यन्ते ।
अन्यायात्याचार - परा मान्या मन्यन्ते ॥
उच्छिद्यते हि धर्मः प्रचुरं प्रसरति पापः ।
चेतसि सचेतसां सततं तिष्ठति संतापः ॥११॥

दुष्टाः सुखिनः सन्ति निरपराधाः पीड्यन्ते ।
उद्धता हि राज्याधिकारिणश्चिरमीड्यन्ते ॥
मधुशाला विलसन्ति न्यायगृहा दह्यन्ते ।
प्रजया तूष्णीकया दुराचारास्सह्यन्ते ॥१२॥

प्रसरीसरीति सहृदय - हृदये सततमशान्तिः ।
विपणि - पथे वरिर्वति श्मशान - समानाः शान्तिः ॥
अहो ! पराकाष्ठा पापस्य शठत्वं प्राज्यम् ।
उत्कर्षः कपटस्य कुटिलतायास्साम्राज्यम् ॥१३॥

---

९. मनुष्यः स्वजीवनं स्वर्गोपमं नरक तुल्यं वा कर्तुं सर्वथा समर्थः
१०. सामयिकीं विभीषिकां वर्णयति । विकचः स्फुटिते ।
११. अपराधिन एव संमाननीया भवन्ति ।
१२. ईड्यन्ते - सेव्यन्ते । मधुशाला - मदिरागृहम् ।
१३. प्राज्यम् - प्रचुरम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हन्त ! दुष्ट वनचोर ! हतक ! ते किमिदं कृत्यम् ।
कथमिव सहते प्रभुः पाप ! ते नग्नं नृत्यम् ॥
स्वामी विक्रमसिंहः सुप्तो हतस्त्वयैवम् ।
राज्यलाभ - लोभे न जनः पश्यति बत दैवम् ॥१४॥

तृषा तथाऽपि गता न तेऽद्य किमिदं वैमत्यम् ।
पापः पाप - जनक इति वचनं नियतं सत्यम् ॥
शिशोरुदय - सिंहादबलादपि शङ्का केयम् ।
किमु न पापिनः पामरस्य बत ! वा न विधेयम् ॥१५॥

हन्त ! प्रभो ! कथमबला प्रबलं निवारयेयम् ।
क्रुद्धसिंह - मुखगतं मृगं कथमिव रक्षेयम् ॥
एक एव सदुपायः सम्प्रति मदभिमुखीनः ।
निज - शिशु - बलिदानेन रक्षणीयोऽयं दीनः ॥१६॥

सुतस्नेहमपहाय मातृहीनोऽयं बालः ।
मया रक्षणीयोऽद्य सपदि समुपस्थितकालः ॥
यदनेन जीवामि न कुर्यां हितं तदीयम् ।
मन्तुं क्षन्तुं कथं पारयेत्प्रभुर्मदीयम् ॥१७॥

स्वार्थ - साधनेनाऽद्य भवेदिह विषमोदर्कः ।
खलकरवालेन प्रभु - शिशु - शोणित - सम्पर्कः ॥
हन्त ! चूर्णितं भवति मनो मुकुरं मे सम्प्रति ।
हृदयोन्माथि - व्यथाकथां कथयेय कम्प्रति ॥१८॥

---

१४. लोभे जनः कुकृत्येऽपि प्रवृत्तो भवति । दैवं नं प्रतीक्षते ।

१५. पामरस्य पापिनः किमु न विधेयमिति न । किमपि कर्तुं प्रभवतीत्यर्थः ।

१६. उदयसिंह - स्थाने तद्वयस्कं निज - शिशुं सम्मुखीकृत्यैव तस्य रक्षणं सम्भाव्यम् ।

१७. मन्तुमपराधम् । समुपस्थितः कालोमृत्युर्यस्य तम् ।

१८. उदर्कः परिणामः । मुकुरम् दर्पणम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आन्दोलन - विवशाऽहं यामि विकलतां सहसा ।
परिचिनोमि कर्तव्य सत्वरमात्मिकमहसा ॥
तर्क - वितर्क - पाश - पतितं मे सदयं स्वान्तम् ।
हन्त ! चक्रवद् भ्रमति शिथिल - पुरुषार्थमशान्तम् ॥१९॥

मनः ! साम्प्रतं साम्प्रतं न ते स्वार्थ - साधनम् ।
कर्तव्यभ्रंशादिह युक्तं मन्ये निधनम् ॥
जीव - जीवनं महोदधेरिव तरल - तरङ्गः ।
अपरिवर्तनीयो मृत्युर्बत ! नियतोऽभङ्गः ॥२०॥

तनुर्नश्वरा नाशमुपैष्यति काले नियते ।
तन्मोहात् कर्तव्य - विनाशे किमिव प्रयते ॥
आत्मा सत्यो नित्योऽमरः परो ह्यविकारी ।
नेति विचारयतीह जनः कथमिह संसारी ॥२१॥

किं घनागमः क्वापि विना रस-गुण - बलिदानम् ।
प्रभुर्भवति किमु रसो विना रस-गुण-बलिदानम् ॥
स्नेहोत्सर्गं विना प्रदीपे किमु प्रकाशः ।
बीज - विनाशं विना न कथमपि पुष्पविकाशः ॥२२॥

इति विचिन्त्य चिरमर्थे स्थिरतामाप्य नितान्तम् ।
कर्तव्ये न्ययुनग् दृढभावा चेतोऽशान्तम् ॥
वनबीराय निवेदयतिस्म प्रियं निज - तनयम् ।
पन्ना सा धन्या हि नाजहाद्दुःखेऽपि नयम् ॥२३॥

---

१९. महस्तेजः । शिथिलः पुरुषार्थो यत्र तत् ।

२०. सम्प्रतं सम्प्रति युक्तं च । मृत्युरपरिहार्यस्तेन न चिन्तनीयः ।

२१. नश्वराय शरीराय कर्तव्यत्यागस्सर्वथाऽनुचितः ।

२२. रसो जलं तस्य गुणश्शैत्यम् तद्विहाय वाष्पी भवति तदैव घनागमः सम्भाव्यते । रसः पारदश्च रसगुणबलि - दानेनषड्गुण-गन्धक-जारणेन प्रभुः समर्थो भवति ।

२३. न्ययुनक् - नियुक्तवती ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पन्ना - सुत - वध - सन्तुष्टो वनवीरो यातः ।
सातु सोदया गता दूरतरदेशम्प्रातः ॥
क्षीणोऽक्षयतां गतः शशाङ्कः श्रित-शिव-भालः ।
प्रिय - जन - संरक्षितो वृद्धिमापद्यत बालः ॥२४॥

मेदपाट - विषये वनबीराश्रितो विषमयः ।
समयात् कथमपि शनैश्शनैर्विषमोऽयं समयः ॥
पराजितो बनबीरः प्रापद्यत यमनिलयम् ।
प्रजासहाय उदयसिंहः सम्प्राप्तोभ्युदयम् ॥२५॥

---

२४. यथा शिवभालाश्रयणेनचन्द्रस्याक्षयता प्राप्तिस्तथैव प्रियजन संरक्षणेन वालस्य वृद्धिः ।

२५. विषयेदेशे । विषमयो विषवत् सन्तापकरः समयात् - गतवान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीयः सर्गः

आसनमेव महीपतेरुदयोऽप्यधिचक्राम ।
शरासनं तु गुणाञ्चितं हन्त ! न समाजगाम ।।१।।

मनसि न मानः सम्मतो 'बाप्पा' कुलज़ेनाऽपि ।
सुप्रताप - तप - जलदता यशोब्जशशिताऽवापि ।।२।।

स्वाभाविक - सद्‌गुण - गणं पितुरपि नायमियाय ।
रत्नाकर - गर्भादिलं कालकूट उदियाय ।।३।।

प्रवर्तयितुमपि सत्पथे प्रजा तु बहु विललाप ।
चन्दन - पादप इव परं न सफलतां समवाप ।।४।।

भोग - भोगि - भोगाहतः प्रमादं न तत्याज ।
विषय - विषावृत - मानसो मोहमयो विरराज ।।५।।

---

१. उदयसिंहो वीरवरस्य संग्रामसिंहस्य सिंहासनं तु प्राप किन्तु गुणेन प्रत्यञ्चयाऽञ्चितं तदीयं शरासनं नावाप । राज्यासनस्थितोऽपि शौर्यं नाशिश्रियत् ।

२. बाप्पावंशजेनापि कुलाभिमानो नादृत इत्येवं प्रताप-यशोविरोधित्वमधिगतम् ।

३. अपि विस्मयार्थकः । कालकूटो हलाहलः ।

४. चन्दनवृक्षे फलं न भवतीति यथा तत्पादपः सफलतां फलसायुज्यं नाप्नोति तथा प्रजयापि न काचित् सफलता शुभसमुदर्कताऽवाप्नि ।

५. भोगः प्रमदामृतिसुखे, सर्पफणे च, 'भोगः सुखे सम्पदि भृतावहेश्च फणकाययोः' । इत्यमरः । सर्पफणाहतस्य विषावृतस्य च प्रमादमोहौ निश्चितावेव ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीक्ष्य विलसतोऽप्याविलान् लास्य-विलासांस्तत्र ।
लक्ष्य - विलक्षण - दक्षता - प्रेक्षाऽबोभोद्यत्र ॥६॥

निरन्तरं च निरादरं निजमन्तर्निर्धार्य ।
मेदुरखेदमुपागता वीरा इति सुविचार्य ॥७॥

'को नस्सङ्ग्रामं विना गरिमाणं जानातु ।
आद्रियते कः कोकिलान् विना वसन्तं जातु ॥८॥

नृपाय किंचित् सूचनं न स्थाने प्रतिभाति ।
शरद्घनाय न बर्हिणः केकामपि विदधाति ॥९॥

त्याज्यं राज्यमिदं द्रुतं मनस्येतदायाति ।
नीरसेऽपि किमु पङ्कजे केलिमलिर्विदधाति ॥१०॥

विमृश्यैवमुद्भट - भटा आररुरन्यजगन्ति ।
अगुणज्ञे गुणिनः स्थितिं कुत्राऽपि न कुर्वन्ति ॥११॥

मदनिद्राणेनैवमपि राज्ञानाजागारि ।
पदमेषां तु विलासिभिः पूरयितुं समपारि ॥१२॥

---

६. लास्यं तौर्यत्रिके नृत्ये । प्रेक्षा प्रदर्शनम् । आविलान् मलिनान् । वीरदृष्ट्या मलिनं हि लास्यादिकं भवति ।

७. मेदुरम्-मेदनशीलम्, समृद्धम् । 'भञ्जभास' इति घुरच् ।

८. संग्रामं, तन्नामानं नृपम् । अथवा संग्रामं रणं विना ।

९. बर्हिणः– मयूरः । मयूरो बर्हिणो बर्ही इत्यमरः । फलबर्हाभ्या मिनच् । केका वाणी मयूरस्य । शरद्घनस्य अन्तःशून्यत्वेन तुल्यता ।

१०. केलि-संचारम्, विलासम् ।

११. आररुः- चर्करीतान्तस्याऽर्तेर्लङि सौ स्वरूपम् । जगत् शब्दोऽत्र देशवाचकः । अगुणज्ञे प्रभौ सतीति शेषः ।

१२. मदमत्तेन राज्ञा यातेष्वपि तेषु न प्रबोधोऽधिगत इतिविचित्रो हि प्रभावो विषयविषस्य, वीराणां च स्थानपूर्तिर्विलासिभिः कृता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोहमद्यमिथ्यारतैरजनि जनैरपि तत्र ।
अनुकरोति प्रायः प्रजा राजानं सर्वत्र ॥१३॥

मधुसमये तु समागते मुदमधिकं स बभार ।
प्रमदः प्रमदाभिवृ`तः केलिं चिरं चकार ॥१४॥

नोपवनेषु कथंचिदपि कामिनीभिरग्लायि ।
वीक्ष्य मधुं मधुपं तथा मन्दं मधुरमगायि ॥१५॥

गीतिः (१)

माधवी - मधुरो मधुरायाति । ध्रुवम्
शिशिर - मथित - कोमल - कलिका - कुल—
मपि विकासमुपयाति । माधवी०

मञ्जुल - वञ्जुल - कञ्ज निकुञ्जे,
मधुर - मोहने मधुकर - गुञ्जे,
शालि - रसाल - मञ्जरी - पुञ्जे
विविधा विभा विभाति ॥१६॥ माधवी०

सरसि सुशोभित - सरस - सरोजं
सुमनः सुमनो - मनसि मनोजम्
उल्लासयन् सुललनोरोजं
पावन - पवनो - वाति ॥१७॥ माधवी मधुरो०

---

१३. जना मोहादिरंता अभूवन् ।

१४. तात्कालिकी ॠतुचर्या साम्प्रतं वर्ण्यते ।

१५. मधुपं मधुपं च उद्दिश्य यत्ताभिरगायि, तद् गीतिद्वयमधस्तान्निरूप्यते ।

१६. वञ्जुलः अशोकः ।

१७. सुमनः शब्दः कुसुमे रसिकेच ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोमल - कल - कोकिला - काकली,–
कलकल - कलित - रसालजाकलिः ।
मन्द - मन्द्र - रव - मधुकरावलीः,
मनसि मुदं विदधाति ॥१८॥ माधवी मधुरो०

'महावीर' कविकुलैः प्रबन्धः,
क्रियते कामि - कलापोऽप्यन्धः
प्रसूनबन्धात् प्रसरति गन्धः
सर्वः सुषमां राति ॥१९॥ माधवी मधुरो०

गीतिः (२)

मधुप ! किमु मधौ मुदं न दधासि !! ध्रुवम् ।
सुमनः सुमनो - मोहक - सुमनसि,
किमु न मधुरतां लासि । मधुप किमु० ।

कान्ति - कला - कलिते - सुकोमले,
विभा - विभासित - विभवे विमले,
तरले सरल - श्यामल - कमले,
कमलं कथं न यासि ॥२०॥ मधुप किमु० ।

विकल - वकुल - विपिनेऽपि न विहरन् ।
रसाल - रसमपि न क्षणं स्मरन्,
नीरस - किंशुक - विभां तु विभरन्,
मत्तः– मतिः प्रतिभासि ॥२१॥ मधुप किमु० ।

---

१८. मन्द्रो गम्भीरः ।

१९. कलापः समूहः ।

२०. सुमनः शब्दो रसिके कुसुमे च । कमत्यर्थमलं सुखं कथं न यासि ।

२१. किंशुकः पलाशः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्ये मधुर - मालती - स्निग्धः
प्रणय - प्रणाली - परम - विदग्धः,
मत्वाऽनलं पलाशं मुग्धः,
प्राणानपि विजहासि ॥२२॥ मधुप किमु० ।

एवं विगते माधवे, ग्रीष्मस्तं समवाप ।
पिशुन - नृपतिरिव शितकरो, लोकानलं ततप ॥२३॥

ज्वलन - ज्वालायामयः पिण्डं यथा विभाति ।
तरुण - तरणि - तप्तं यथाऽऽभां ब्रह्माण्डं राति ॥२४॥

सन्तप्तस्सर्वो ध्रुवं छायाश्रयमादाय ।
उच्चाटन - मन्त्रं जपति तूष्णीको ग्रीष्माय ॥२५॥

किन्तु नृपो जल-यन्त्र-जल-वलित-नलद-कलितेषु ।
ग्रीष्मातपमपि नान्वभूत्, भूमि - गर्भ - भवनेषु ॥२६॥

सततं सन्तापाश्रयो, ग्रीष्मश्शान्तिमवाप ।
को न दुःख - दायी जगति, परिणामे क्षयमाप ॥२७॥

---

२२. प्रणय प्रणालीत्यादौ 'प्रेह्णेवा' इति यकारस्य लघुत्वं ज्ञेयम् ।

२३. वसन्तकालिकीं चर्यां वर्णयित्वा ग्रीष्मचर्यां प्रस्तौति । पिशुनः क्रूरः । शितकरः सूर्यः । अलमत्यर्थं लोकांस्तताप ।

२४. वह्निज्वालासन्तापित लौहपिण्डमिव तीव्र-सूर्यदग्धं ब्रह्माण्डं भाति अयो लौहम् । तरणिः सूर्यः ।

२५. छायामाश्रित्य स्थितानां तूष्णींभावमुत्प्रेक्षते ।

२६. जलयन्त्रम् 'फुहारा' इति प्रसिद्धम् । तज्जलसिक्तोशीर - तृणमय-प्रावरणावृतेषु । भूमिगर्भभवनेषु-'शरदखाना' इति ख्यातेषु । नलदः उशीरः ।

२७. अर्थान्तरन्यासेन ग्रीष्मनिवृत्तिं दर्शयति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चातक - चेतश्चन्दयन्, मदयन् मनुज - मनांसि ।
प्राप्तो वर्षन् घन-घनो, दलयन् विरहि - यशांसि ॥२८॥

यान्ति मराला मानसं वीक्ष्य मदं जलदस्य ।
कुपथान्वेषण - रण - मते: कटुरव - रटितगुणस्य ॥२९॥

उपवनेषु हरितावनौ सविनोदं विचचार ।
हिन्दोलन-केलिं मुदा, वनिताश्रयश्चकार ॥३०॥

मृदु गर्जन्तं वारिदं काऽपि दर्शयामास ।
गायन्ती वर्षाच्छटां तदा वर्णयामास ॥३१॥

गीतिः

नभसि नव - नीरद - विभा विभाति ।
तपन - निपीड़ित - चातक - चेतश्चिरं चटुलतां याति । नभसि०

शुचि - शिव - शीत - शीकर - स्नात:
ललित - लता - लालन - निष्णात:
नीप - गन्ध - सम्बन्ध - ख्यातः
सरस-समीरो वाति ॥ नभसि० ।३२।

---

२८. चन्दयन् आनन्दयन् । मनुजमनांसि मदयन् सन्तापनाशहेतु-भूतत्वात् । घनः सान्द्रो घनो मेघः । विरहिणो हि मेघं विलोक्य व्याकुलतां मुञ्चन्ति इति सहिष्णुत्वरूपं तद्यशो नश्यति ।

२९. वर्षासु जल-निपातेन मार्गा पङ्कसंकुलतां यान्ति । कटुरवामण्डूकाः । मरालेषु सज्जनव्यवहारारोपः । कुमार्गिणः कटुरव (दुष्ट) प्रशस्तस्य राज्ये न सज्जनाः क्षणमपि तिष्ठन्ति ।

३०. नृपस्य वर्षाचर्या वर्ण्यते स नृपः इति शेषः ।

३१. मधुरं मधुरं गर्जन्तं मेघमालोक्य गायनेच्छा स्वाभाविकी ।

३२. समीरस्य शीतलमन्द-सुगन्धाद्या-स्त्रयोऽपि गुणा वर्णिताः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धवल - बलाका - कीलित - कूलम्
नीलाम्बरं सरसता - मूलम्
तारकितं प्रावृषो दुकूलम्
चीनांशुकमिवभाति ॥ नभसि० ।३३।

प्रियतम - यौवन - सार - नवसुधा
बिन्दु - स्यन्द - नन्दिता वसुधा
यतमाना तदपह्नवे मुधा
ऽप्यङ्कुरिता प्रतिभाति ॥ नभसि० ।३४।

जयति सजल - नील: पर्जन्य:
धाराधरः सुधीरो धन्यः
कस्तु जगति निज - जीवनमन्यः
परहिताय विजहाति ॥ नभसि० ।३५।

सुप्रमाद - परिवृढ - जलद - राज़्यं लयं जगाम ।
शरत्सुन्दरी तत्पदं द्रुतमप्यधिचक्राम ॥३६॥

नभसि विमलता भूतले, गत - पङ्कतोदियाय ।
हत - जवतां सरितां गणः काशः काशमियाय ॥३७।

चन्द्र - चन्द्रिकायां नृपश्चञ्चलतां समवाप ।
मत्तो रमणीभिस्सह, प्रियं मृदु - प्रललाप ॥३८॥

---

६३. वर्षा नायिका रूपेण-वर्णिता ।

३४. वसुधामेघयोर्नायिका-नायकत्वेन वर्णनम् ।

३५. मेघपक्षे जीवनं जलम् । अन्यपक्षे च जीवितम् ।

३६. वर्षा-निवृत्तिः शरदागमश्च सकारणोल्लेखं सूच्यते ।

३७. हत-जवतां हतवेगताम् । काशस्तृणविशेषः । विकासमधिगच्छतिस्म ।

३८. शरच्चर्या वर्ण्यते । प्रललाप-इति कामि - चाटुकारितायाः प्रलाप–तुल्यत्वात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ शीतेऽप्युपबृंहिते, हेमन्तः प्रससाद ।
शिशिरः शीत्काराश्रयो महिमानञ्च ससाद ॥३९॥

सङ्कुचन्ति दिवसा अहो ! शीत - भीतिवशमेत्य ।
जहौ चण्डतां दिनमणिर्मन्दकरानभ्येत्य ॥४०॥

घर्माय क्वचिदपि यदा, स्थानं नासामास ।
तदा कामिनी - कुच - शरणमेत्य सुखं स उवास ॥४१॥

कस्तूरी - रचनाञ्चितौ, कुचौ नृपोऽप्यवलम्ब्य ।
सीत्कृतिमपि नाशिश्रियत् शीतं सपदि विडम्ब्य ॥४२॥

तं विलासनिरतं तथा, वीक्ष्य सपत्न - गणेन ।
प्रमुदितमन्तस्सर्वथाऽऽप्यजनि च विपुलरणेन ॥४३॥

विषयान्धो यवनैर्जितो, ददौ करं बहुशोऽपि ।
परतन्त्रां कृत्वा महीं रतस्तथा भूयोऽपि ॥४४॥

पुनरपि स वसन्तोत्सवं तत्र तथैव बभार ।
विलसितलासक - गायनैरूपवनमलं चकार ॥४५॥

---

३९. उपबृंहिते — वृद्धि प्राप्ते ।

४०. हेमन्त-शिशिरयोर्विलक्षणः प्रभावः प्रस्तूयते । दिनमणिः सूर्यः ।

४१. यदा घर्मः सर्वथा निराश्रितो जातः तदा कामिनीकुच - शरणं प्राप्य सुखपुरस्सरं निर्भयमुवास । स घर्मः ।

४२. हेमन्त-शिशिर-चर्या । यस्य शीतस्य भयात् जनः सरोमोद्गमं कम्पते, तमपि स नृप उपेक्षते स्म ।

४३. शत्रवो हि विलासरते नृपे कुर्वन्त्येवाक्रमणम् । तदा विपुलरणमभूत् ।

४४. किन्तु पराजयमाप्य स यवनानां करदोऽभूत् ।

४५. परतन्त्रतायामपि तस्य तथैव विलास-परायणतैव मेदपाटावनेर्दुर्भाग्यहेतुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ महिषी च महीपतेर्मुदा गर्भमाधत्त ।
मन्त्रिगणोऽपि नवाशया, सुखाश्वासमादत्त ॥४६॥

मृदभिलाषया गिरिसमर, - दर्शन - कामनयाऽपि ।
निजसूनोः सद्गुण - गणः प्रकटोऽकारि तयाऽपि ॥४७॥

सा प्रताप-गर्भा तथा, कान्ति कलयामास ।
सुप्रताप - गर्भा यथा, कुलकीर्तिर्विललास ॥४८॥

अथ महिषी समये प्रभा, - भासित सुतमसविष्ट ।
दिवस-दीप इव दिनकरो, दीप्ति-चितोऽप्यदविष्ट ॥४९॥

मनसि विविच्य ग्रहबलं, गदितं गणकगणेन ।
अहो ! कृमि-कुलैराकुले, पङ्केऽजनि कमलेन ॥५०॥

महोत्सवमलं प्रमुदिताः प्रमदाः कृतार्थयन्ति ।
गन्धसार - जल पिच्छिले, पथि मधुरं गायन्ति ॥५१॥

---

४६. उदयसिंह - कार्यनिराशो मन्त्रिगणः कामप्याशामापत् ।

४७. मृदभिलाषया अत्र बहुव्रीहिः । तयेत्यस्य विशेषणम् । अभिलाष शब्दः पुंसि प्रवर्तते ।

४८. पूर्वत्र प्रतापः तन्नामा चरितनायकः । अपरत्र प्रतापः—प्रभावः । "स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्" तेजस्तु 'अधिक्षे-पावमानादेः प्रयुक्तस्य परेणयत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् इति वचनादवधेयम् । एवं विधतेजः स्वरूपप्रभाव विशिष्टा राणावंशकीर्तिर्यथा संग्रामसिंहादि समये विललास ।

४९. तत्काल - प्रसूत-शिशुप्रभा-तिरस्कृतो दिनकरोऽपि दिवसदीपतां प्राप । निरस्तविभो जातः ।

५०. विषयव्यापृतोदयसिंह-गृहे प्रताप-प्रसवं विलोक्य पंकात् कमलोत्पत्ति-वर्णनंसाभिप्रायमेव ।

५१. सम्प्रति श्लोकचतुष्टयेन यथा तात्कालिकैः कविजनैः स उत्सवो वर्णितस्तथा दर्शयति । गन्ध एव सारोऽस्येति गन्धसारश्चन्दनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सद्वितानमधिकारिजन, आतत्य स्वसभासु ।
हर्षोत्कर्षमचीक्लृपत्, सुविनोदैश्च प्रजासु ॥५२॥

ध्वजावृते तोरणतले, दिनं निशात्वमियर्ति ।
लसित – तडिद्दीपा निशा दिनभ्रमं चरिकर्ति ॥५३॥

नृप – कुमारमीक्षितुममर – वधू – जनोऽप्यायाति ।
नयनैर्नभः सरोजवृत – सरो – भ्रमं विदधाति ॥५४॥

एवमुत्सवं कविजनः कलया कवयामास ।
पुरस्कारमपि वाञ्छितं, कामं कलयामास ॥५५॥

स्वमेदिनी – मेदुर – मदैः सह स समेधामास ।
शैशवेऽपि प्रतिभाबलाज्जनांश्चित्रयामास ॥५६॥

पदजितमम्बुजमलिमिषाद्, विषमन्तर्निदधाति ।
कृत्वा तनुमपि खण्डशो, हंसेभ्यः प्रददाति ।५७॥

---

५२. वितानमुल्लोचमातत्य सुसज्जितसभाभवनेष्वधिकारिभिर्हर्षनिवेदन पुरस्सरमभिनन्दन - महोत्सवः समपादि ।

५३. दिवसे निशाभ्रमः निशि च दिनभ्रम इति चमत्कारः ।

५४. प्रतापमीक्षितुपागतस्यामरवधूजनस्य नयनेषु सरोजारोपणेन नभसि सरोभ्रसस्य युक्तियुक्तता न दुरुपपादा ।

५५. एवमुत्सवं वर्णयन्तस्तात्कालिकाः कवयो राजकीयैरतिशयं पुरस्कृताः ।

५६. मेवारमही - महोत्सवैः सह स शिशुर्वर्धनं प्रापद्यत । बाल्येऽपि चमत्कारैरद्भुतैस्तत्रत्यान् चकितानिवाकरोत् ।

५७. प्रतापचरणवर्णनम् । तच्चरणेन जितं कमलं दुःखातिशय - सहनाक्षमं विषं गिलति, खण्डशः कृत्वा स्वदेहं च हंसेभ्यः प्रयच्छति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नहि दोषाकरता गता, श्रितशिव-भालस्याऽपि ।
प्राप्य यद्वदन-भालवं, तेन कलाधरताऽऽपि ॥५८॥

यद्गति-तर्जित-गौरवो, न हरी रुषं जहाति ।
नयनकर-कलाधारिणं, मृग-गज-कुलं शृणाति ॥५९॥

अथ च विलक्षण-शिक्षया, लक्ष्यदक्षतामार ।
वाहन-वाहन-निपुणतां, पटु-भटतां च ससार ॥६०॥

रीति-पण्डितश्चाभवत्, दण्डस्य च काव्यस्य ।
जातो गण्यो गुणविदां, धनुषोऽपि न्यायस्य ॥६१॥

शक्ति-सुरक्तिमदर्शयद्, व्याकरणेऽपि रणेऽपि ।
निरूक्तेऽभियुक्ति तथा, पर-नगराक्रमणेऽपि ॥६२॥

एवं निपुणोऽब्रोभवीद्, ग्रन्थेषु तथाऽस्त्रेषु ।
विख्यातिं यातः परां शस्त्रेषु च शास्त्रेषु ॥६३॥

---

५८. योहि चन्द्रः शिवभालमाश्रित्यापि लोके दोषाकरत्वेन प्रसिद्धः, स एवं प्रतापवदन-भा-लवमधिगत्य कलाधरत्वमापद्यत ।

५९. प्रताप-गति-तिरस्कृत-गमन-महत्वः सिंहस्तन्निर्यातनाऽक्षमस्तन्नयन-करानुकारिणं मृगगजकुलं द्वेष्टि इति—प्रत्यनीकता ।

६०. तस्य कलाकुशलतापादनं प्रतिपाद्यते ।

६१. दण्डस्य रीतिः प्रकारः । काव्यस्य च रीतयः प्रसिद्धाः । धनुषो गुणः मौर्वी । न्यायस्य च गुणाः रूपरसाद्याः ।

६२. व्याकरणे शक्तिरक्तिमभिधाश्रयणम् । रण च पराक्रमप्रदर्शनम् । निरुक्तेऽभियुक्ति गौरवम् । परनगराक्रमणे चाभिग्रहणम् ।

६३. एवं पूर्वप्रदर्शित-प्रकारेण ग्रन्थास्त्रयो-र्नैपुण्यम् शस्त्र-शास्त्रयोः ख्यातिंचावाप ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृपाणस्य कृपणस्य वै, कोषं नयाद् दधार ।
उपवनेषु समितौ तथा, सुमनश्चयं बभार ।।६४।।

कीर्ति–लवाधिकृतः शशी, शम्भु–शिरसि समुदेति ।
यत्तेजः स्पर्द्धी रविः, कुवलये न रुचमेति ।।६५।।

यौवराज्यमध्याप, स प्रताप – सिंहामिधः ।
तमो–द्वेषि – रुचमाप, रविरिव चास्य यशस्सपदि ।।६६।।

---

६४. कृपाणस्य-करवालस्य कोषं-ग्रावरणम् । कृपणस्यच कोषं द्रव्यराशिम् । नीत्या राजानएव कृपणधनं गृह्णन्ति । सुमनः शब्दःकुसुमे विदुषिच ।

६५. कीर्तिलवपरतयैव चन्द्रस्तु शिवशिरः स्थितिमपि प्राप्नोति । रविस्तु तेजः स्पर्धया कुवलये महीमंडले, कमले च कान्ति नाश्रयति ।

६६. तमोध्वान्ते शोकेच । प्रतापसिंहाधिकृतत्वेन मेदपाटस्य सर्वोऽपि शोकः शान्तः । सोरठाच्छन्दः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थः सर्गः

क्षण – क्षण – क्षण – लक्षणो रसमयः स समयोऽपि ।
क्वचिद् व्यलेष्ट बहिः प्रियश्चान्तर्गरल–मयोऽपि ॥१॥

विषय – वासना – लसित – मतिरुदयोऽप्यस्तमवाप ।
रात्रौ कोक–कदम्ब इव वधूजनो विललाप ॥२॥

अथ प्राज्य – राज्यासनं प्रसभं चाधिजगाम ।
सुप्रताप – परतापनः प्रतापसिंहो नाम ॥३॥

तस्य नृपस्य चरोऽचरोऽप्यभिनन्दनं चकार ।
दत्वा स्वगुणोपायनं मोदं मनसि बभार ॥४॥

गांभीर्यं रत्नाकरो धैर्यं वसुन्धरा च ।
महिमानं हिमगिरिरलं रुचिररुचिं कमला च ॥५॥

सुधाकरत्वं चन्द्रमास्तेजो दिनमणिरेव ।
ददौ वदान्यवरेण्यतां कल्पद्रुमस्तदैव ॥६॥

---

१. क्षणः-त्रिंशत्कलात्मकः कालपरिमाणः, उत्सवश्च । क्षणे क्षण उत्सवाश्रय इति भावः । अन्तर्विषमयोऽपि बाह्यदृष्ट्याप्रियः स समयो व्यलेष्ट ।

२. उदयोऽप्यस्तमवाप इति विरोधाभासः ।

३. प्रसभं-बलात् । इति प्रताप-राज्याक्रमणसामयिकपारस्परिक - विरोध-सूचनम् ।

४. चरश्चलनशीलः । अचरः स्थावरः । सर्वोऽप्यभिनन्दनं चकारः । इति राज्याक्रमणेन सकल-विरोध-निवर्तनं सूच्यते ।

५. रुचिं कान्तिम् । ददौ इति शेषः ।

६. सुधाकरत्वममृताश्रयत्वम् । वदान्यो दानशौण्डे चारुवादिनिवा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं सकलं गुण–गणं श्रित–शौर्यः स बभार ।
स्वर्णं रत्नारोचितं सुरभि - समन्वयमार ॥७॥

गर्जदर्जुनं तद्यशो यथा यथा प्रससार ।
तथा तथा विधुरपि ह्रिया जडतामेव बभार ॥८॥

यः स्वप्नेऽपि विलोकितो रिपु - हृदयं विददार ।
यश्च मोहने विपिन इव संग्रामे विचचार ॥
संग्रामे विचचार वीरवरमौलिमणिः सः ।
वैरियशो – विधु – विभाहरस्तरुणस्तरणिः सः ॥
सुरतरुरिव समलोककामना - पूर्तिकरो यः ।
सुमनः सुमनसि सरस - भावना - स्फूर्तिकरो यः ॥९॥

प्रतापसिंहः परतापकारी दधात्यजस्रं विनयं नयं च ।
समानचित्तोऽप्यसमानचित्तो यश्च प्रसिद्धः समदोऽप्यमत्तः ॥१०॥

सकलासु कलासु कृती सुकृती समुनस्सुमनस्सु मतस्सुमतः ।
बहुलक्षणवान् बहुल-क्षणवान् सुपदाभिगतस्सुपदाभिगतः ॥११॥

---

७. प्रतापस्य गुणगणाश्रयणं हि स्वर्णस्य सौरभाश्रयणम् ।

८. 'विधुरपि ह्रिया' इत्यत्र 'प्रेह्ववा' इति 'पि' इत्यस्य लघुत्वम् ।

९. तरुणस्तरणिः चण्डकरः सूर्यः । सुमनः सुमनसि प्रशस्तमनस्के विदुषि । कुण्डलियाच्छन्दः ।

१०. विनयं नयं च इति विरोधः विनयं प्रश्रयमिति परिहारः। मानेन सहितमिति, असममिति च । अप्रमत्तश्च इति क्रमशो विरोध परिहारः । उपजातिच्छन्दः ।

११. कृती कुशलः, सुकृती पुण्यात्मा । प्रशस्तचिन्त्तविज्ञेषु मतः श्रेष्ठः . सुमनः सद्विचारः । बहुलक्षणवान्, वहुल - क्षणवान् इतिच्छेदः । क्षण उत्सवः । पदं चरणस्थाने च । तोटकच्छदः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भानुर्भारत - भूतले चन्द्रो जन - निचयेषु ।
मङ्गल एव सदा सकल - साधनीयकार्येषु ।।१२।।

बुधो - विविध - विद्या कुले गुरुर्गण्यगणेषु ।
शुक्रो दुर्जन - तरुवने शनिस्सपत्न - चयेषु ।।१३।।

राहुः सुकलङ्कितजने केतुर्निजवंशस्य ।
एक एव रूपं दधौ लोके ग्रहनवकस्य ।।१४।।

प्रभातायिता चैकदा रजनिर्यदा ललास ।
चक्रवाकचञ्चूपुटं चिरं चकासामास ।।१५।।

वीक्ष्य प्रकाशं वारुणी - रत - शशिनाऽप्यत्रापि ।
सतत - वितत - तारातति: सुव्यलेष्ट कुत्रापि ।।१६।।

विजयपताकामिव विभाकर - प्रभां निध्याय ।
हृदयं तमसो नृपरिपोरिव संभित्तिमियाय ।।१७।।

विकसितकोमलकोकनद – सुकुमारेण करेण ।
सुनभो – रत्नाकर – लसित – मुक्तामणिभ्रमेण ।।१८।।

---

१२. अथ त्रिभिर्विशेषकम् । भानुः – भास्वान् । प्रकाशकारी चन्द्र आनन्दनः । मङ्गलो मङ्गलमयः कल्याणमूर्तिः । दोहाच्छन्दः ।

१३. बुधो विद्वान् । गुरुः श्रेष्ठः गण्यस्तु गुणावधिः । शुक्रः अग्निः ।

१४. राहुः सैंहिकेयः । केतुर्ध्वजः । श्लोकत्रये श्लेषेण नवग्रह-रूपता तस्य स्पष्टा ।

१५. प्रभातायिता प्रातः काले परिणता ।

१६. वारुणी पश्चिमादिक् । अत्रापि अलज्जि वारुणी (मद्य) रतः प्रकाशे लज्जते इति स्फुटम् । विशेषकम् ।

१७. तमसोन्धस्य हृदयं नृपशत्रोरिव संभित्ति भेदमियाय ।

१८. अथ युग्मम् । कोकनदं रक्तोत्पलम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रातः सन्ध्या – सुन्दरी नक्षत्राणि चिचाय ।
हारं निर्मातुं प्रणयि – दिनकरोपहाराय ॥१९॥

संसच् शोभित - नृपतये किमपि कथयितुं नाम ।
चारश्चार – परायणः कश्चित्तदाऽऽजगाम ॥२०॥

विहित - नतिः प्रोवाच मृदु - वाचागभीरयाऽति ।
"सम्राजः सेनापतिर्मान – सिंह आयाति ॥२१॥

कुटिल - रीति - नीति - प्रियः सम्मेलन - च्छलेन ।
विचरति यवन – नृपद्विषो दण्डयितुं प्रबलेन" ॥२२॥

वचो निशम्य महीपतिः किमपि चिन्तयामास ।
स्वागताय सेनापतेश्चमूमेधयामास ॥२३॥

मानिनि माने चागते स्वागतमलं चकार ।
विशयविषाकुल - मानसे - सुधास्तुतिः प्रससार ॥२४॥

परं प्रतापो भोजने सायुज्यं न बभार ।
शिरश्शूल – कैतवरतोऽप्यसमर्थतां ससार ॥२५॥

---

१९. प्रातः सुन्दरी मुक्ताभ्रमेण नक्षत्राणि चिचाय। दिनकरोपहाराय मणिमालां निर्मातुं हि मुक्तानामावश्यकता। अतएवप्रातर्नक्षत्राणामदर्शनम्।

२०. चारपरायणः विचरणशीलः कश्चिच्चारो गुप्तचरः।

२१. सम्राजोऽकबरस्य सेनापतिर्मानसिंह आम्बेराधिपः।

२२. मेलनमिषेण तत्तद् राजकीय-नीतिज्ञानं हि तद्भ्रमणेहेतुः।

२३. मानसिंहस्य तत्रागमनमेव चिन्ताकारणम् अतएव सैन्यसमेधन-प्रसङ्गः।

२४. विशयः संशयः। स्वागतं विलोक्य संशयालुरपि मानसिंहो मोदमवाप।

२५. सायुज्यं सहकारिताम्। कैतवं छले, व्याजे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्त्वमत्र सत्त्वं तथा नृपतेरपि निध्याय ।
एधमानमानो मनसि मानः कोपमिपाय ॥२६॥

पाटलिपाटललोचनो वचनं रचायामास ।
"अहो ! मानसिंहं घृणां छलाद् दर्शयामास ॥२७॥

सुखसुप्तः सिंहः कथं प्रबोधितो दर्पेण ।
क्रीडनमपि किमु वाञ्छितं पादाहत - सर्पेण ॥२८॥

प्राप्स्यसि फलं भयावहं द्रुतं निजाविनयस्य ।
नाहं क्षन्तुं पारये मन्तुं तुच्छजनस्य" ॥२९॥

रोष – रोषिता, दूषिता, यदेति गीरश्रावि ।
नरपतिना सस्मितमुखं तत्रैवं प्रास्तावि ॥३०॥

"गिराडम्बरेणाम्बरं नावलम्बतां जातु ।
यद् यद् भवते रोचते तत्तदलं विदधातु ॥३१॥

---

२६. अत्र एतद्विषकं तत्त्वं सारं, नृपतेः प्रतापस्य सत्त्वं बलमपि च निध्याय मानसिंहः क्रुद्धोऽभूत् ।

२७. पाटली (पाटला गुलाब) कुसुमसमे पाटले लोचने यस्य सः । अहो इत्यादि तुच्छजनस्येत्यन्तं मानसिंह वचनम् ।

२८. अन्योक्ति पुरस्सरं गर्वोक्तिरियं मानसिंहस्य । सुख-सुप्तसिंहप्रबोधन सर्प-पादाघातवत् दुरुदर्कमिदं कार्यमिति ध्वनिः ।

२९. मन्तुमपराधम् । तुच्छपदेन 'भवादृशां दमनं तु मे लघ्वीमात्रा' इत्यादि सूच्यते ।

३०. प्रतापसिंहोऽपि तत्रैव क्वचनान्तर्हित आसामास । मानसिंह-वचनं च श्रुत्वा प्रकटितेनोदतारि ।

३१. गिराडम्बरेणेत्यादि वितनेत्यन्तं प्रतापवचनम् । वचने किमु यत्करणीयं तत्क्रियतामिति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्बन्धे यवनैस्सह प्रथम मानिनां मान ! ।
कुल - मानः किमु मानसे वेदनां न वितताना ? ॥३२॥

काममेवमन्ये नृपाः कुर्वन्त्त्वपि सर्वत्र ।
किमपि न सहयोगं परं दास्यामो वयमत्र" ॥३३॥

एवं वाग्बाणै रलं मर्माहतो विमुह्य ।
क्रुद्धो ययौ स देहलीं द्रुतं करिणमारुह्य ॥३४॥

प्रतापश्च निजमन्त्रिभिः सह विचारयामास ।
मेदपाटचिन्तामनसि सर्वेषां विललास ॥३५॥

किन्तु किमपि कृतनिश्चयः कार्यं मनसि निधाय ।
आजुहाव सर्वाः प्रजाः विपदो निवेदनाय ॥३६॥

सर्वस्सामान्यो यदा सभास्थलं प्रससार ।
स तदा विनय - नयान्वितः समुदीरयांचकार ।३७॥

"अयि धर्माधारा जनाः ! सावधानतां यान्तु ।
देशदुर्दशादर्शन – स्थिर – दर्शना विभान्तु ॥३८॥

---

३२. प्रथम शब्दस्य देहली-दीप-न्यायेनोभयत्र प्रयोगः। यवनैस्सह सम्बन्धेऽपि प्रथमस्त्तथा मानिनामप्यग्रगण्यः।

३३. सर्वेऽपिनृपाः कामंयवनैः सहसम्बन्धं कुर्वन्तु, परमस्माकं तु सर्वथा विरोधएव।

३४. मर्मसु आहतः। देहलीम् - इन्द्रप्रस्थाख्यां राजधानीम्।

३५. एवं रणनिमन्त्रणं प्रदाय स्वसैन्यस्याल्पतां च निध्याय प्रतापसिंहोऽपि नितरां चिन्तितोऽभवत्।

३६. कार्यम् – कर्त्तव्यम्। विपदः – भाविमानसिंहाक्रमणस्य ।

३७. स प्रतापसिंहः। सविनयं सनयं च अयि इत्यादि अविदितमिति कस्येत्यन्तमुवाच ।

३८. देशदुर्दशाया दर्शने स्थिरे दर्शने लोचने येषांते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुष्कर्माणः पामरा धर्म - कर्म कृन्तन्ति ।
वर्णाश्रम - नाशे भृशं शौर्यं प्रदर्शयन्ति ॥३९॥

कुल - कलङ्किनो हिन्दवः किन्तुताननुसरन्ति ।
निजकरेण जातिद्रुमं मदमत्ताः प्रहरन्ति ॥४०॥

विषयविषव्यापृतधियो धैर्यं निजं विहाय ।
आश्रयन्ति यावन - मतं क्षणिक - क्षण - लाभाय ॥४१॥

किन्तु विगतधर्मा न ते सम्मानं संयान्ति ।
किमु कथमपि गततेजसस्तेजस्विनो विभान्ति ॥४२॥

जन्म - मही तेषां द्रुतं पराधीनतां याति ।
दीना हीनदशा सततमश्रुकणान् विजहाति ॥४३॥

आपदापतत् साऽधुना मेदपाट देशेऽपि ।
अहो ! धर्म आक्रम्यते श्रित - परम - क्लेशेऽपि ॥४४॥

किमिह साम्प्रतं साम्प्रतं विचारेण प्रतिभाति ।
धर्मो भूश्च न कस्य वा रक्षणीयतां याति ॥४५॥

---

३९. वर्णाः - ब्राह्मणादयः । आश्रमाः - ब्रह्मचर्यादयः । तेषां व्यवस्थायानाशे ।

४०. यवनानुयायिनो हिन्दवो 'यस्याः शाखाया आश्रितस्तामेवच्छिनत्ति' इत्याभाणकं चरितार्थयन्ति ।

४१. क्षणिक-क्षण-लाभाय - अस्थिर - सुख-सिद्धये ।

४२. धर्मं विहाय केचनाऽपि न सम्मान-भाजो भवन्ति, तेजस्विनो हि तेजो विहाय कुत्र सुखमश्नुवते ? अनलोहि ज्वलनावस्थां (तेजः) व्यक्त्वा स्वकीयां सत्तामपि नाश्रयतीति-विचार्यम् ।

४३. तेषां यवनानुयायिनाम् । जन्मभुवः पराधीनता निश्चिता ।

४४. हन्त ! सा पराधीनता रूपा आपदापतन्ती मेदपाटेऽप्यनुमीयते ।

४५. युक्ते द्वे साम्प्रतं स्थाने अधुना साम्प्रतं तथा। धर्मो भूश्च सर्वेषामेव रक्षणीये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदरदरी - भ्रष्टैरलं यत्र सुखेनाऽस्थायि ।
यस्य चान्नजलपालितैर्न क्षणमप्यग्लायि ।।४६।

अप्रपन्नशरणोऽधुना देशः स विपन्नोऽस्ति ।
तदुद्धार - यत्ने न बत ! कोऽपि समासन्नोऽस्ति ।।४७।।

यः प्राण इव प्राणिनां पालनीयतामेति ।
संसारेऽसारेऽपि यं श्रितः सारमभ्येति ।।४८।।

यं विना न कश्चिज्जगति सुखसत्तामपि याति ।
उष्णत्व - विरहितोऽनलः किमु स्थितिं विदधाति ।।४६।।

सनातनोऽपि शनैः शनैः कलौ स लयमुपयाति ।
धर्मधनानां मानसं किमु करुणां न दधाति ।।५०।।

व्रतं धारये किमपि सुखभोगं न करिष्यामि ।
पालितधर्मो निजभुवं यावन्न वरिष्यामि ।।५१।।

नाशक्यं किंचिज्जगति सत्यसंध - लोकस्य ।
अभ्रपुष्पमपि चातको यात्यविदितमिति कस्य ।।५२।।

---

४६. जन्मभुवो रक्षणीयत्वे हेतुं निर्दिशति-उदरदरी-भ्रष्टैः मातृगर्भनिर्गतैः ।

४७. एवमुपकारकर्त्र्या जन्मभुवो विपन्नत्वेऽपि न कश्चित्तदुद्धारायोद्यच्छते इति बत ! खेदावसरः ।

४८. धर्मस्य रक्षयीयत्वे हेतुं निर्दिशति-प्राण इवेत्युपमयाऽवश्यपालनीयत्वम् ।

४६. धर्मं विना न कश्चिज्जगति सुखेन सत्तां याति । अनल उष्णत्वं विना कुत्र दृश्यते ।

५०. सनातनोऽपि लयमुपयातीत्याश्चर्यम् ।

५१. प्रतापस्य प्रतिज्ञां दर्शयति ।

५२. अभ्रपुष्पं जलम् । आकाश कुसुमं-असंभवंवस्तु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदा प्रतापो नैज - मतमेवं द्रढयामास ।
सर्वस्तत्र स्वीकृतिं द्रुतं दर्शयामास ॥५३॥

चित्तहरं त्यक्त्वा ततो नृपो गिरिगुहामार ।
तत्स्नेह - प्रवणा प्रजा प्रमुदा तमनुससार ॥५४॥

प्रेम्णा पालयताऽपि, प्रजां, फलैर्जीवनमलम् ।
नरवरेण समवापि, चेतसि किमपि न कष्टमिह ॥५५॥

---

५३. प्रजा राजानुयायिनी इति प्रकटयति ।

५४. अनेन प्रजायां तस्य प्रभावातिशयो द्योतते ।

५५. प्रजां प्रेम्णा जीवनं च फलैः पालयताऽपि तेन न मनसि खेदः प्राप्तः ।
सोरठाच्छन्दः ।

●●

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पंचमः सर्गः

नेत्र – वन्हि – रस – चन्द्र – मित - वैक्रमवर्षे तत्र ।
म्लेच्छानां महती चमूः, संव्यापत् सर्वत्र ॥१॥

ग्रीष्म-विभातो वरविभा-करविभया स्म विभाति ।
मही तुषार - मणिस्रजं, कुसुम - हृदि स्म दधाति ॥२॥

अधिक - मले कमलं जले, रुचिरां रुचं स्म याति ।
सूर्य - मुखी - सुमनः स्थले, परमां सुषमां राति ॥३॥

विस - विशदे च शिलातले, प्रताप आसामास ।
मन्ये कीर्तिकला - स्थितः प्रतापो हि विललास ।४॥

मानसिंह — सेनापतेश्चारस्तमुपससार ।
प्रणति – प्रवणः सूचनां. समुदीरयांचकार ।५॥

"मानो युधि सत्त्व-रहितः, स्वजन-मोद - कृद् भाति ।
अहिताऽपकरो याचते त्वां समरं स मुदाऽति" ।६॥

वचन-रचनया स्मित-मुखः, प्रतापोऽपि निजगाद ।
'आहितुण्डिको गत-बलः, समरं किमुपससाद' ॥७॥

---

१. १६३२ वैक्रमे संवत्सरे मानसिंहेन मेदपाटदेश आक्रान्तः । इत्यैतिहासिकं तथ्यम् ।
२. विभातः प्रभातः प्रियतमप्रभाकरपरितोषाय भूमिभामिनी कुसुम-हृदये तुषार (ओस) मणिमालां दधाति ।
३. जले कमलं, स्थले च सूर्यमुखीसुमनो विभाति ।
४. विस - विशदे अरविन्दोज्वले । प्रतापश्चरितनायकः । शुभ्रत्वेन शिलातलकीर्तिकलयोः साम्यम् ।
५. प्रणति - प्रवणः - कृतप्रणामः ।
६. सत्त्वरः : हितः, सत्त्त-रहितश्चेतिच्छेदः । कृत्-इति करोतेः कृन्ततेश्च । अहिताऽपकरः अहितापकरश्चेतिच्छेदः ।
७. 'सत्त्वरहितः' अहि - तापकर इत्यर्थं स्वीकृत्य साकूतमियमुक्तिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरुवाच दूतस्तदा, साटोपं कोपेन ।
"स्फुटमपूर्ववीरः कथं, मतोऽबलो भूपेन ॥८॥

"किमवीरो बलवान् भवेच्चेतसि चिरमवधेहि" ।
भूपति - तर्जित-मतिरलं गतः स प्रभुसविधे हि ॥९॥

मानो दूततिरस्कृतिं श्रुत्वा धैर्यमपास ।
सपदि च संग्रामाय निजचमूं सज्जयामास ॥१०॥

"हल्दी - घाटी" स्थानमपि मासे नभसि रुरोध ।
प्रतियोद्धुं सज्जित - भटः प्रतापोऽपि चुक्रोध ॥११॥

स्वयं "चेतके" हयवरे चिरं चकासामास ।
धनुरिव जलदे, मुकुटमपि कच-निचये विललास ॥१२॥

सुविशाले भाले रुचिर - चन्दन - रुचिरुदियाय ।
चन्द्र-कला कान्ति यथा रुद्रशिरसि समियाय १३॥

कला - कलित - कोमल - करः शत्रु - शालि - शूलेन ।
साम्यमयात् कण्टक - निचित - सरस - कमल-मूलेन ॥१४॥

---

८. अपूर्ववीरोऽद्वितीयः शूरोऽपि कथमबलत्वेन मत इति दूताभिप्रायः ।

९. अकारपूर्वो वीरः । इति विचार्य सोत्प्रासवचनं नृपस्य श्लोकत्रये वक्रोक्तिः स्फुटा ।

१०. धैर्यमपास-धीरतां तत्याज । अत्र 'असु क्षेपणे' धातुः ।

११. 'हल्दीघाटी' इति मेवाडदेशे प्रसिद्धं स्थानम् । नभसि - श्रावण ।

१२. धनुः इन्द्रधनुः । जलदकचयोः कृष्णत्वेन साम्यम् । धनुर्मुकुटयोश्चित्रत्वेन ।

१३. रुद्रोपमया शत्रुभयंकरत्वं प्रतापस्य ध्वन्यते

१४. कलया कलितः कोमलश्च प्रतापस्य करः । शूलेन सहितः । सकण्टक कमलसाम्यमयात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाजि - वरेण्यश्चेतको नृत्यति रण - वाद्येन ।
यवनानां कालाहिरिव रुद्र - डमरु - निनदेन ॥१५॥

देवासुरयोरिव तयो, युद्धेन ततोऽभावि ।
तुमुलंज्यारवमन्तरा तदा किमपि नाश्रावि ॥१६॥

संग्रामाम्बुनिधौ भृशं, कम्बु - विभा विललास ।
वाडवाग्निभासान्वितः खड्गचयो विजहास ॥१७॥

चेतकोऽपि विदधौ मुदा, नानागति - निर्माणि ।
शरैः प्रतापः समभिनत्, वर्म - चर्म - मर्माणि ॥१८॥

शरगतिरिव शोणित - नदी, दुर्दम - जवतामाप ।
भैरव - रव - रचितां महीं शूर - गणस्समवाप ॥१९॥

गृध्र - शकुनि - कुक्कुरमुखैः शोणित - तृप्तिरपारि ।
सादि - निषादि - पदातिभिर्वसुधाऽऽश्लेषोऽकारि ॥२०॥

प्रापप्तन् कुञ्जरवराः प्रहता घनाघनेन ।
यथा कञ्जपुञ्जोच्चयाः कुञ्जे प्रभञ्जनेन ॥२१॥

---

१५. कालाहिः कालसर्पः। वाजिवरेण्यः अश्वश्रेष्ठः। 'चेतक' इति संज्ञा।

१६. एतेन युद्धस्य भयंकरता सूच्यते।

१७. वीर-वाद्यमान - शंखैः, वाड़वाग्नि - प्रभैः खड्गैश्च संग्रामस्याम्बुनिधित्वं युक्तम्।

१८. चेतकस्तन्नामा प्रतापाश्वस्तदा नानागतिनर्म विदधौ प्रतापश्च शरैः शत्रूणां वर्मचर्ममर्माणि समभिनत्। वर्मादीनां हिभेदनं क्रमशः।

१९. दुर्दमजवतामप्रतिहतवेगवत्ताम्। भैरव-रवरचितां - सैनिकानां भीषण शब्दै व्याकुलाम्।

२०. अश्वारोहास्तु सादिनः। हस्त्यारोहा निषादिनः। इत्यमरः।

२१. घनाघनेन - शस्त्रेण। कञ्जपुञ्जोच्चयाः कमलसमूहाः। प्रभञ्जनेन वायुना।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मत्त - मान - मातङ्गमिह वीक्ष्य मुदितनयनेन ।
आचक्राम स सिंह इव जागरितश्शयनेन ॥२२॥

'स्मर सम्प्रति कुलदेवता मयि यवनाश्रित मान !' ।
प्रहरंस्तत्र प्रताप इति वीरवचो विततान ॥२३॥

कुन्त - प्रहृत - गजः परं भयात्पलायनमार ।
एवं नियतिवशादसून् मानस्तदा बभार ॥२४॥

रिपुवीराऽऽक्रान्तिः परं प्रतापेन समवापि ।
एकेनाऽपि तदा द्रुतं बहुषु सफलता प्रापि ॥२५॥

शीघ्रमेव स विपद्गतस्तत्सैनिकैर्व्यचारि ।
झालाकुलवीरेण तन्मुकुटं शिरस्यधारि ॥२६॥

स्वामि - भक्त सेवक - गणै रेवं त्राणमियाय ।
तैश्च प्रसभं प्रेरितः स प्रस्थितो वनाय ॥२७॥

निशितायुध - पीड़ित - तनु श्चेतक इतश्चचार ।
विकट - यवन - भट - युगलमपि शनकैस्तमनुससार ॥२८॥

चेतकस्तु पारं गतो गिरिकुल्यामुल्लङ्घ्य ।
यवनाश्वौ च न शेकतुर्गन्तुं ततो विलङ्घ्य ॥२९॥

---

२२. स प्रतापः जागरितः सेट्कत्वेन 'जाग्रो' इति गुणेन चेत्येवं रूपम् 'जागृत' इति त्वशुद्धम् ।

२३. स्मरेत्यादि - 'मान' इत्यन्तं च मानं प्रति प्रतापवचनम् ।

२४. गजपलायनेनैव मानसिंह प्राणरक्षा- इति भाग्यवशादेव ।

२५. एवं प्रतापसिंहः शत्रु मध्यगतोऽपि महान्तं पराक्रममदर्शयत् ।

२६. झालाकुलवीरः प्रतापमुकुटं स्वशिरसि दधौ तेन शत्रवो भ्रान्तिमापुः । प्रतापः स्वसैन्यमाजगाम । झालावीरश्च वीरगतिं प्राप । इत्यहो स्वामिभक्तिः ।

२७. रणभूमितो गन्तुमनिच्छन्नपि सेवकैर्हठात् प्रस्थापितः ।

२८. नृपं गच्छन्तं वीक्ष्य हन्तुकामाभ्यां वैरिभटाभ्यामनुसरणं कृतम् ।

२९. गिरिकुल्या — पार्वती स्वल्पनदी ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्यश्चाश्वारोहको वीरस्तदाऽऽजगाम ।
आततायियवनावुभौ खड्गेनाऽऽचक्राम ॥३०॥

तौ निहत्य पारं श्रितो भूपं तमाजुहाव ।
'क्षणं तिष्ठतान्नीलहय - वाहक महानुभाव ! ।३१॥

तन्निशम्य धृत्वा पुनः शितकृपाणमधिपाणि ।
मेदपाट - धरणी - भृता रोषेणैवमभाणि ॥३२॥

'बाप्पाकुल - दावानल, म्लेच्छ, शीघ्रमायाहि ।
बन्धु - वधार्थमुरीकृतं निज प्रणं परिपाहि' ॥३३॥

सप्रश्रयमागन्तुक - स्तूष्णीं समाजगाम ।
त्यक्त - तुरग - कवचायुध - स्तत्पदयोः प्रणनाम ॥३४॥

चरणौ दृग्जलधारया चिरं क्षालयामास ।
प्रतापस्तु गद्गद् गिरा किमपि न कथयामास ॥३५॥

ततः शान्तमनसा पुन र्नरपतिनैव मभाणि ।
'तात, समाश्वसिहि, प्रियं वद किं ते करवाणि' ॥३६॥

तस्य तु लोचनजलमलं सकलं गलं रुरोध ।
शनैः समाहित - चेतसा परिस्थितिं प्रबुबोध ॥३७॥

---

३०. अश्वारोहिणा घातकावुभौ हतौ ।

३१. ततश्चाग्रे गच्छन्तं नृपमाकारितवान् ।

३२. प्रतापोऽनुजं शक्तिसिंहमायान्तं विलोक्य रोषेणाऽऽविष्टो बभूव । शक्तिसिंहः प्रतापं द्विषन् यवन - सम्राजः शरणमगमत् ।

३३. वाप्पा - शिशोदियावंश-पूर्वपुरुषो वाप्पा नाम्ना जनैः सम्बोध्यतेस्म '

३४. शक्तिसिंहः पूर्वकृतापराधस्य प्रायश्चित्तं चिकीर्षति ।

३५. प्रतापसिंहोऽपि तस्य व्यवहारमाशाविपरीतं विनयान्वितं निभाल्य स्नेहातिरेकेण भावुकतामापद्यत ।

३६. स्नेहान्वितः किमपि कर्तुं समुद्यतोऽभवत् ।

३७. लोचन - जलम् - अश्रुप्रवाहः अलमत्यर्थम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऊचे, 'गुणसिन्धो प्रभो, बन्धुमिमं त्रायस्व ।
क्षन्तुमनर्हतमं परं मन्तुं मम क्षमस्व' ॥३८॥

तत्प्रतापसिंहो नृपो मुदा निशम्य बभाण ।
'शक्तिसिंह, सिंहासनं शासनमपि च गृहाण' ॥३९॥

ततः शक्तिसिंहेन तच्छ्रुत्वा स्फुटमारोपि ।
'समर्थो न सिंहासने बिना भवन्तं कोऽपि ॥४०॥

कामये न राज्यं क्वचिन्नान्यत् किंचिद् वश्मि ।
देशद्रोही धर्मतः पराङ्मुखोऽप्यहमस्मि ॥४१॥

कुल - कृतघ्न - पद - कलमषान्मुच्ये कथमहमत्र ।
नैवं शान्तिमवाप्नुयां दिवंगतोऽपि परत्र' ॥४२॥

एवं संलपतोस्तयोश्चेतक – हयो मुमोह ।
भुवि लुलोट, धुन्वन् शिरः स्वर्गं समारुरोह ॥४३॥

वीरवरोऽपि व्याकुलस्तस्मै बहु विललाप ।
स्वामिभक्त - विरहे न हि स्वान्तं शान्तिमवाप ॥४४॥

औौर्ध्वदेहिकीं सत्क्रियां तस्य तदैव चकार ।
तत्स्मारक – निर्माणमपि नियतं मनसि दधार ॥४५॥

---

३८. क्षन्तुमनर्हतमम् - सर्वथैवाशक्यम् । मन्तुमपराधम् ।

३९. अनुजानुराग - परायणो मेदपाटराज्य सिंहासनाऽऽरोहणं प्रास्तौत् ।

४०. किन्तु शक्तिसिंहेन दृढं प्रत्याख्यातः ।

४१. राज्यं तथाऽन्यद्वस्तुजातं निषिध्य प्रायश्चित्त-भावनां प्रकटीचकार ।

४२. कल्मषात् - कलङ्कात् ।

४३. सहसैव चेतकस्य भूलुण्ठनेन परिस्थितौ परीवर्तः प्रावर्तिष्ट ।

४४. प्रतापसिंहः स्वकीयं हयं प्राणादपि प्रियममंस्त ।

४५. औौर्ध्वदैहिकीम् - देहस्यान्तिमां क्रियाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततः शक्तिसिंहः पुनः प्रतापाय प्रणनाम ।
तस्मै निजं तुरङ्गमं दत्वा स्वयं जगाम ।।४६।।

एवं यवनैः सह नृपो बहुधा रणं चकार ।
किन्तु सु - सेना - विरहितः साफल्यं न ससार ।।४७।।

नहि तथापि नैजे व्रते शैथिल्यं समवाप ।
गाङ्गेय इवालौकिकीं सत्य - सन्धतामाप ।।४८।।

उदविजिष्ट धीरोऽप्यहो ! प्रजा - दशां निध्याय ।
सन्धिपत्रकं प्राहिणोद् यवननृपाकबराय ।।४९।।

यवनानामधिपस्तदा मुमुदेऽप्यदो निरीक्ष्य ।
पृथ्वीराज - नृपः परं विरुणद्धिस्म परीक्ष्य ।।५०।।

सन्धिपत्र - सत्यापने, स तु सन्देहमियाय ।
व्यससर्जत् पत्रं स्वयं श्रीप्रतापसिंहाय ।।५१।।

---

४६. शक्तिसिंहश्चेतक - मृत्युखिन्नाय बन्धवे स्वकीयं तुरगं दत्वा निज शिविरं जगाम ।

४७. एवं बहुधा रणपरायणोऽपि सैन्याऽल्पतया न सफलोऽभूत् ।

४८. पर्वत - प्रदेशे - विचरन्नपि परायण - परायणोऽपि शैथिल्यं न प्राप । सत्यसन्धताम् दृढ़प्रतिज्ञताम् ।

४९. स्वयं धीरः सहनशीलोऽपि निज - प्रजाया दुर्दशां निरीक्ष्य खिन्न उद्विग्नोऽभूत् । सन्धिपत्रे 'क' प्रयोगोऽनिच्छा प्रदर्शकः ।

५०. पृथ्वीराजो राठौड़ वंश्यो राजस्थानी कविः प्रसिद्धोऽकवर सेवायां बीकानेर-राजप्रतिनिधि - रूपेण स्थितः ।

५१. प्रवञ्चनायैवान्येन केनाऽपि प्रहितमिति सन्देहः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठस्सर्गः

(पृथ्वीराज–पत्रम्)

विषय - विष - विरक्तस्सत्य - सन्धस्समन्तात् ।
प्रबल – बल – विपक्ष – क्षोद – दक्षः क्षितीन्द्रः ।।
विनय - नय - विभातः श्रीप्रतापः प्रतापी ।
प्रणतितिमलं मे साम्प्रतं स्वीकरोतु ।।१

कार्यजातं विधातुस्सदात्यद्भुतं
न्याय - वुद्धया दरिद्रं दरीदृश्यते
हेयनिर्गन्धमाढ्यः पलाण्डुर्गुणैः
कण्टकं सत्प्रसूनेषु संलक्ष्यते २

सर्वदा प्राप्नुवन्त्यात्मघोषा बलिं
राजहंसाश्च जीवन्त्यहो ! शैवलैः
बालिशस्साधु सम्पत्तिमास्वादते
हा ! बुभुक्षाऽर्दितो हिण्डते पण्डितः ३

गन्धसार - द्रुमे न प्रसूनोद्गमः
कुत्सितः किंशुकः पुष्पितो दृश्यते
बन्धनं यान्त्यहो ! वारणाधीश्वराः,
सञ्चरन्ति स्वतंत्राश्च कौलेयकाः ४

---

१. मालिनीच्छन्दः । विपक्षक्षोद-दक्षः - शत्रु-मदचूर्णने चतुरः ।

२. सत्प्रसूनं सुपुष्पम् 'गुलाब' नाम्ना प्रसिद्धम् । स्रग्विणीच्छन्दः ।

३. आत्मघोषा वायसाः । बालिशो मूर्खः ।

४. गन्धसारश्चन्दनम् । कौलेयकः सारमेयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जायते पुष्करं कर्दमात्सर्वदा
कालकूटोद्भवो हन्त ! रत्नाकरः
चन्दिरश्चन्दिरश्च प्रियो लाञ्छितो
वर्ण्यये तत्प्रमाद कियत् साम्प्रतम् ५

प्रिय, यवन–सम्राजः करे यत्सन्धिपत्रं दृश्यते
तत्सत्यमेव हि किं भवद् - हस्ताक्षरेण विशिष्यते
कटुकण्टकेन यथा सुमनसामन्तरं चेच्छिद्यते
पत्रेण तेन तथा भृशं सुमनो - मनो बेभिद्यते ६

सम्मानयिष्यत्यकबरः सम्राट् सहर्षं साम्प्रतम्
परमुच्चमानधनस्य भवतः कार्यमेतदसाम्प्रतम्
राणान्वयोऽयं वीरबाप्पाऽलङ्कृतः संस्मर्यताम्
किं सम्मतं तेनेदमिति विमलान्तरेण विचार्यताम् ७

कण्ठीरवः क्षुत्क्षामकण्ठोऽसून् कथञ्चिद् धारयेत्
परितोऽप्यटव्यां पर्यटन् सत्वान्न हन्तुं पारयेत्
परमेष सुख-शयनं तु काञ्चन-पञ्जरेऽपि न कामयेत्
न तु वा क्षुधामुपलब्ध-रोचक-भोजनैरपि शामयेत् ८

यद्यपि विषम - विपदो भवन्तं बाधयन्ति पदे पदे
किं चक्रवातः पादपं नैवच्छिनन्ति छदेच्छदे
स्वीकृत्य कः परतन्त्रतां निज - विपद्वारणमीहते
दुष्प्राप्य - पीयूषं विहाय हलाहलं न समीहते ९

---

५. पुष्करं कमलम् । कालकूटो विषम् । चन्दिर आनन्द-करश्चन्द्रश्च ।

६. सुमनसां कुसुमानाम् । सुमनो-मनो विबुध-चित्तम् । हरिगीतिका-च्छन्दः ।

७. साम्प्रतमिदानीमसाम्प्रतमयोग्यं च । विमलान्तरेण शुद्ध-मनसा ।

८. कण्ठीरवः सिंहः । सत्वान् जीवान् ।

९. चक्रवातो वात्याचक्रं पादपान्निर्मूलयति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किं विस्मृतं - नृपमानसिंह इहागतः प्रथमं यदा
भुक्तं न भवता तेन साकं शिरःशूल - मिषात्तदा
ब्रूयान्न किं मानी स मानः सदयमद्य विचार्यताम्
अपमान-जनि-परतन्त्रता-वृत्तिस्तदा हृदि धार्यताम् १०

सहसाऽऽपद्याऽऽपच्चिरं सा न स्थास्यति जातु
कथमर्कं कादम्बिनी रोद्धुं क्षमतां यातु ११

प्रालेयोपलतापनस्तपनाऽऽतपो यथैव
प्रतापोऽपि परतापनस्तव प्रताप ! तथैव १२

साधय सखे ! स्वतन्त्रतामालस्यं हि निरस्य
गिरिरपिरेणुकणोपम - स्सत्य - सन्ध - वीरस्य १३

देश – दशाया दर्शने द्रुतमवधानं देहि
धर्म - धरा - संरक्षणे दृढ - सन्धां सन्धेहि १४

यवन - सैन्य - सिन्धौ नृपति - पदलं लीनतां याति
परं प्रतापः परहितः पद्म - प्रभां दधाति १५

राजन्यकुलमन्यत् क्षणे जन्येषु येन निहन्यते
त्वां जेतु मात्मानं प्रभुं यवन-प्रभुः स न मन्यते
ज्वाला - करालो ज्वलनवेगो वारिदैर्दन्दम्यते
शम्पा सुकम्पाऽपि न परं यत्नेन तैः शंशम्यते १६

---

१०. मानी मानसिंहः सघृणं किं किं न कथयिष्यतीत्ति पूर्वमेव विचारणीयो विषयः ।

११. आपत् - प्रापत् - प्राप्ता । आपत् - आपत्तिः । कादम्बिनी मेघमाला। दोहाच्छन्दः ।

१२. प्रालेयोपलो हिमखण्डः कठिनः ।

१३. सत्य-प्रतिज्ञः पर्वतं रणु-कण सभं मनुते ।

१४. सन्धां प्रतिज्ञाम् ।

१५. सर्वेषु नृपेषु प्रतापस्याद्वितीयतां ख्यापयति ।

१६. जन्यं युद्धम् । प्रभुः समर्थे स्वामिनि च । हरिगीतिका च्छन्दः । शम्पा तड़ित् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वैर्नृपैरुररीकृता शिरसैव यवनाऽऽधीनता
किन्तु प्रताप ! न शोभते भवतीदृशी मति-हीनता
प्रोत्तुङ्गभालैरति - विशालैः पादपैर्नन्नम्यते
शैलेन किन्तु न तीव्र - झञ्झावायुरप्यनुगम्यते १७

सम्राडकबर - मधुकरः पिबति रसं सर्वत्र
सुप्रताप - चम्पा - सुमं त्यक्त्वा यात्यन्यत्र १८

बुधा विहायाऽन्यानतो भवद् यशो गायन्ति
उदिते चन्द्रे न हि जनास्तारागणं भजन्ति १९

आदायाऽकबरकरात् सन्धिपत्रमधिपाणि
'न प्रताप - लिखितं त्वदो' मया सगर्वमभाणि २०

दर्पोद्धितवचनानि मे सफलान्यलं विधत्स्व
निजकुलाभिमानं तु वा दूरे क्वचिन्निधत्स्व २१

सखे, विस्मृता किमु कथा कुम्भ गुण ग्रामस्य
सन्धा हम्मीरस्य वा कीर्तिः सङ्ग्रामस्य २२

कस्तावत्सूर्यान्वये न परान् परं तताप
त्वमेव कुलमानं तदा कथं जहासि प्रताप ! २३

---

१७. झञ्जावाते प्रचण्ड - प्रभञ्जन - वेगे सर्वेऽपि वृक्षा नम्रीभवन्ति किन्तु न पर्वतः ।

१८. भ्रमरश्चम्पा कुसमं न गच्छतीतिकविसमयः । दोहाच्छन्दः ।

१९. अन्यान्नृपान् विहाय ।

२०. अकवर-राजसभायां प्रताप-सन्धिपत्र-प्रदर्शन-समयोक्तं वचनं प्रस्तौति ।

२१. सन्धिपत्रास्वीकारेणैव वचनानां सत्यापनं सम्भवभन्यथा कुलाभिमान-स्त्याज्य इति भावः ।

२२. पूर्वज - स्मृत्या प्रतापमुत्साहयति ।

२३. परान् – शत्रून् । परमत्यर्थम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वीकुर्यश्चेद् दासतां त्यजेद् दिनेशो धाम
याचकश्च कल्पो, जले ज्वलेद्दीपको नाम २४

वह्नि दहिकतां त्यजेद् गतिं मारुतो जातु
दिशि प्रतीच्यां भास्करः किमिव समुदयं यातु २५

अलमधिकेनैवं वचो दृढ - निश्चयमभिधेहि
किं भवतां प्रभु - भावना म्लेच्छानामधिपे हि २६

सम्राजोऽकबरस्य समक्षं बत ! निजभालम् !
नमयिष्यसेऽथवा करालं धनुर्विशालम्
गर्व - समुन्नतमिह कुर्यां किमु शिरः प्रशस्तम्
पातयेयमथवा मोलौ विनतो निजहस्तम्" २७

प्रतापोऽपि पत्रं पठन् प्रमुदा नैव ततर्प
मेदपाट - महिमा मनसि शनैः शनैः प्रससर्प २८

भावान्निध्याय च सततमुत्साहेन ललास
ग्लास्नुरलं स्थास्नुर्व्रते द्रुतमुत्तरयामास २९

---

२४. सूर्यस्तेजस्त्यजेत् कल्पतरुश्च याचको भवेत् । जलेऽपि दीपको ज्वलेदितिभावः ।

२५. पद्यद्वये दासता - स्वीकारमसम्भव-कल्पनया योज्यते ।

२६. दृढोनिश्चयोयत्रतद्वचः ।

२७. सन्धिप्रस्तावस्य स्वीकारास्वीकारे स्पष्टमुत्तरं सोत्प्रासमपेक्ष्यते । रोलाच्छन्दः । पूर्णंच पृथ्वीराजपत्रम् ।

२८. मेदपटः मेवाड़ इति ख्यातः । दोहाच्छन्दः ।

२९. ग्लास्नुः ग्लानः क्लान्तः । स्थास्नुः स्थिरः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महीश्वर-मौलि-मुकुटायमान-पृथ्वीराज !
प्राप्य भवत्पत्रं मनस्तथा मोदमयये !
चन्द्रेण चकोरो यथा कोकिलो वसन्तेनाथ
वर्षाभिर्मयूरो हर्ष-प्रकर्षं दर्शयते
आत्मरहस्येन योगी ग्रीष्मतप्तः सलिलेन
भूरिसम्पदा दरिद्रो यथा सुखं चयते
नेत्रलाभेनाऽन्धः पत्या विरहः विदग्धा सती
स्नेहेन प्रदीपो यथा सन्तोषमाश्रयते ३०

ज्ञ ! समुदं समुदञ्चदलं दल
शुभवता भवता प्रहितं हितम्
रसमये समये समचिन्तयं
नवसुधा वसुधातलमालिलत् ३१

आसमेकदा विजने विपिने भृशं विषण्णः
बहुच्छाय – वृक्षस्य कस्यचित्तले निषण्णः
देश - दुर्दशा - दर्शन - दारुण - दुःख - निलीनः
मातृ - धरित्र्याः पुनरुद्धार - विचार - विलीनः ३२

रामकृष्ण – जननीयं या जननीति – व्यथिता
हिमगिरि - मुकुटाऽलङ्कृताऽपि परतंत्रा प्रथिता
रत्नाकर - चुम्बित - चरणाऽपि दरिद्रा दीना
वीर – प्रसवित्री वसुन्धरा यवनाधीना ३३

---

३०. प्रताप - पत्रम् । घनाक्षरीच्छन्दः ।

३१. ज्ञ ! मतिमन् । सर्वेषुपदेषुयमकाऽलङ्कारः । द्रुत - विलम्बितंच्छन्दः ।

३२. सन्धिपत्र - लेखन - कारण - प्रसङ्गं प्रस्तौति । रोलाच्छन्दः ।

३३. जनानां नीति-र्व्यवहारस्तया व्यथिता । रत्नाकरः सागरः । सर्वेषु चरणेषु विरोधाभासः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किन्तु वयं मोहाद्विषमय – विषयेष्वासक्ताः
वीरव्रतं विहाय दासतायामनुरक्ताः
जननी – समां जन्मभूमिं बत कथं स्मरामः
श्रुति – पुटयोस्तूलं विन्यस्य सुखं विचरामः ३४

कथं मेदपाटोन्नतेराशाऽनुष्ठीयेत
कथं क्षत्रियाणां मतिः स्वधर्मेऽवतिष्ठेत ३५

पदे पदे विपदो नदाः क्षारं क्षते क्षिपन्ति
सततं नागरिकाञ्जनान् यवन - सैनिका घ्नन्ति ३६

किं कर्तव्यं कम्प्रति सम्प्रति विचारणीयम्
दीन - जनानां हननं सपदि च निवारणीयम्
कोषाः खड्गानां रिपवेऽर्थानां वा हेयाः
तुङ्गानां धनुषां शिरसां वा नतिर्विधेया ३७

कः परन्तु मयि जीवति द्विषते धनं ददातु
कस्मै वा सीसोदिया शिरो नतं विदधातु ३८

विपन्ने स्व - विषये तु को विषयासक्तो जातु
कः प्राणान् युद्धं बिना शयनीये विजहातु ३९

तदाऽश्रौषमिति चिन्तयंश्चीत्कारं सर्वत्र
व्यलोकयं कन्यां स्विकां क्रन्दन्तीं बत ! तत्र ४०

---

३४. कर्णयोस्तूल - निक्षेपः सुख-विचरणे हेतुः । देशदशोपेक्षा सोत्प्रासं वर्णिता ।

३५. अवतिष्ठेत, 'समवप्रतिम्यः स्थः' इति तङ् । दोहाच्छन्दः ।

३६. नव - विपदामुदयः क्षते क्षार निक्षेप इव ।

३७. कोषः खड्गपिधाने धननिधौ च । अर्थोधनम् । रोलाच्छन्दः ।

३८. सीसोदिया - तन्नाम - वंशोद्भवो - राणा - परिवारः । दोहाच्छन्दः ।

३९. विषयो देशे, इन्द्रिय - गोचरे च ।

४०. इति उपर्युक्तं चिन्तयन् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्याः पञ्चष – वासरा गताविनाऽऽहारेण
कष्टलब्धमपि · तत्करात् हृतं हि मार्जारेण ४१

विहरन्तिस्म सदैव या मणि - मण्डित भवनेषु
सम्प्रति ता विचरन्त्यहो कण्टकितेषु वनेषु ४२

सुपीयूष – पानोचिताः पङ्किल – पयः पिबन्ति
बाला बाप्पावंशजाः शष्प - भुजो जीवन्ति ४३

भूस्वातन्त्र्य - समीहया सहे विषाद - शतानि
किमपराद्धमेभिः परं जाने नैव भवानि ! ४४

सन्धिस्त्वेषां पालने विधेयो हि यवनेन
उपायो न कोऽपीक्ष्यते सम्प्रति विना ह्यनेन ४५

एवं वीत – विवेक – मतिरबोभवं दैवेन
तव पत्रेण प्रबोधितः स्वातन्त्र्य प्रवणेन ४६

तृषा – पीड़ितश्चातको भास्कर – कर – तप्तोऽपि
निम्न – नीरमिच्छति यदा पातुं दृढ़व्रतोऽपि ४७

तदा सुताप – घनाघनो घनो घनः समुदेति
कुकवितेव किल नीरसा रसा रसानभ्येति ४८

---

४१. पञ्चष - दिनेभ्यो बुभुक्षिता बालिका यथाकथंचित् प्राप्तमन्नं विडालेनाऽपहृतं विज्ञाय क्रन्दति ।

४२. या बालिका ।

४३. बालाः बालकाः ।

४४. जगज्जननी 'भवानी' सम्बोध्यते ।

४५. बालानां पालनार्थमेव सन्धि - विचारः ।

४६. दैववशाद् बुद्धिर्विवेक - हीनाऽभवत् ।

४७. तृषार्दितश्चातको दृढ़व्रतोऽपिव्रतं त्यक्तुं वाञ्छति ।

४८. घनाघनस्तापनिवारकः । घनः सान्द्रे मेघे चं । रसः शृंगारादौ । रसा क्षितिः । रसान् - जलान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्प्रति माम्प्रति धारणां सुदृढां मनसिनिधत्स्व
यवन – समक्षं मस्तकं गर्वोन्नतं विधत्स्व ४९

परिवारोऽप्याजीवनं सज्जीकृतो वनाय
नमयिष्यामि न कथमपि स्विकभालं यवनाय ५०

समुदेष्यति सूर्यस्सदा प्रातः प्राच्यामेव
भवान् मर्दयतु पाणिना समदं मुच्छामेव ५१

दत्वैवं स तदुत्तरं तोषं समधिजगाम
भू – वैभवं विवेचयन् मातृ–महीं प्रणनाम ५२

वसुधे ! तेऽङ्के वसतिरिह रतिश्च रेणुकणेषु
त्वंचाऽगतिकानां गतिः प्रणतिस्तव चरणषु ५३

इह ते क्रोड़े क्रीडतां स्वदतां मधुर – फलानि
बहुविधसस्यानश्नतां पिवताममृत – जलानि ५४

वनोपवनयोर्विचरतां स्वपतां घूलि – चयेषु
नाऽस्माकं क्वचिदपि भवेत् स्पृहा स्वर्ग – विषयेषु ५५

---

४९. धारणा भावना ।

५०. स्विकं निजम्]

५१. मुच्छा - 'मूंछ' नाम्ना लोके प्रसिद्धा ।

५२. पत्रोत्तर - प्रदानेनानिश्चित - स्थिति - निवृत्या सन्तोष-प्राप्तिः ।

५३. येषां कुत्रापि गतिर्न भवति तेषां धरैव गतिर्भवति ।

५४. क्रोड़े - अङ्के ।

५५. जन्मभुवः स्वर्गादयि गरिमाणं साधयति :

●●

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तमस्सर्गः

परितोऽटव्यां पर्यटन् प्रतापो न विरराम ।
मनसि पारतन्त्र्यानल – ज्वाला नैव शशाम ।।१।।

सम्मेलनमायोजितं सर्व – जनीनं तेन ।
तत्सम्बन्धे सूचनाः प्रसारिता यत्नेन ।।२।।

बहुसंख्या आसन् भटाः समुपस्थित – प्रजासु ।
उत्साहोऽपि विलक्षणः प्रावर्तत सर्वासु ।।३।।

तत्र स्वच्छ – शिलातले प्रतापोऽपि निषसाद ।
ससम्मानमालोचयन् तदा स्वयं निजगाद ।।४।।

"अयि सम्मान्या बन्धवो मद्वचनं शृण्वन्तु ।
चेतश्चञ्चलतामपि क्षणमिह संवृण्वन्तु ।।५।।

सदा वन्दनीया मे मातृमही महीयसी ।
गुणि – गण – गणनीया गिरीश – गरिमा–गरीयसी ।।

यवनाधीना खिद्यतेऽद्य परमियं नितान्तम् ।
कस्य न परतंत्रता भृशं क्लिश्नाति स्वान्तम् ।।६।।

---

१. पारतंन्त्र्यपीड़ाह्य द्वेगे कारणम् । दोहाच्छन्दः ।

२. सङ्घे शक्तिः कलौयुगे - इति निश्चित्यैव सम्मेलनमायोजितम् ।

३. उपस्थित - जनतायां वीरसैनिकानां बाहुल्यमासीत् ।

४. परतन्त्रताऽऽक्रोशमूला हि समालोचना ।

५. चित्तचञ्चलता-त्यागेनैव विचार-विमर्शे सहभागित्वमुचितम् ।

६. गिरीशः शिवः । महाराणाकुलस्य परमोपास्यः 'एकलिङ्ग' नामा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जननीसमा जन्मभूमिर्यदि चान्याधीना ।
पुत्रास्तदपि भवन्ति न चुलुकित - जले निलीना ॥
दुर्द्दश्यां दुर्दशां विलोक्य न किमु वेपन्ते ।
न तु कृतघ्न – चरिता गत - लज्जाः क्षणं त्रपन्ते ॥७॥

मेदपाट धरणी हि साम्प्रतं यवनाधीना ।
किन्तु वयं तिष्ठाम उदासीन वदासीना ॥
भिया कान्दिशीकाः सर्वे सम्मीलित – नयनाः ।
श्रुतिपुटके तैलं निधाय संश्रित–सुख–शयनाः ॥८॥

परकृत – परिभव–प्रतिकाराय न किमपि विदध्मः ।
मातृभुवः स्वातंत्र्य – समीहां मनसि न दध्मः ॥
यद्यपि नाऽस्ति शत्रुभिस्सह सङ्ग्रामे भीतिः ।
नाऽप्यस्माक स्वातन्त्र्याधिगमे संशीतिः । ९॥

न स्वतन्त्रता – समः कोऽपि जगतीह पदार्थः ।
भुज्यते न परतन्त्रै रानन्दोऽपि यथार्थः ॥
यथा प्रमुदिता विहगा विहायसा विहरन्तः ।
कनक–पञ्जरे तथा न दुग्धौदनं चरन्तः ॥१०॥

अन्न - शष्प - कवलैर्न तथा पशवः प्रतिबद्धाः
अल्प - सस्य - वति वने यथा गन्तुं सन्नद्धाः
कोऽपि न जीवः सहते पराधीनता - पाशम्
परमुपेक्षते मनुजः स्वाधीनता - विनाशम् ११

---

७. चुलुकित-जले निमज्जनं निकृष्टतममरण सूचकापवाद-जनक-लोक-वचन मूलकम् ।

८. कां दिशं यामीत्याह 'तदाहेतिमाशव्दादिभ्यः' इति ढक् । किं-कर्तव्य-विमूढाः ।

९. संशीतिः संशयः ।

१०. परतन्त्रतायां न कोऽप्यानन्दमुपभोक्तुं समर्थः । चरन्तः अश्नन्तः ।

११. परतन्त्रतायां प्रशस्तमपि खाद्यं न रोचते । स्वतन्त्रतायां तुच्छमकिंचित्करमपि मोदास्पदं भवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जड़ - चेतन - समुदाये तु च यः सर्व - श्रेष्ठः ।
उचिताऽनुचित - विवेक - शील - जीवेषु ज्येष्ठः ॥
स तु समीहते न कथं स्वातन्त्र्यं साधयितुम् ।
मातृ – भूमि – बन्ध – च्छेद – व्रतमाराधयितुम् ॥१२॥

पारतन्त्र्यमापदामास्पदं भवति नितान्तम् ।
यद्विवशो जीवन्नपि जीवः स्मरति कृतान्तम् ॥
सर्वे मनुजाः स्वार्थ - परा परितो वीक्ष्यन्ते ।
प्रसभं सेवा – व्रते दासधर्मे दीक्ष्यन्ते ॥१३॥

स्वार्थ - परैः साध्यते समन्तात् स्वेच्छाचारः ।
पारेव्योम व्याप्रियते – पाप – व्यापारः ॥
मर्द्यन्ते हि मर्यादा दीन – दला दम्यन्ते ।
अत्याचार - परा विहतागस्काः क्षम्यन्ते ॥१४॥

विवशा अबलाः प्रबलैः विपणौ विक्रीयन्ते ।
सत्य - विवेक - क्षमा - दयाः सततं क्षीयन्ते ॥
किन्तु न कविषु न तरुणेष्वपि निरीक्ष्यते क्रान्ति ।
सर्वेष्वपि लक्ष्यते श्मशान – समाना शान्तिः ॥१५॥

चिन्तयन्तु साम्प्रत मस्माभिः किं कर्तव्यम् ।
स्वीय - पूर्वजानां चरितं सततं स्मर्तव्यम् ॥
कथं वारणीया अस्माभिर्दुर्विपत्तयः ।
किमु समुन्मूलनीयाः समूलमपि दुष्प्रवृत्तयः" ॥१६॥

---

१२. चराचरेषु श्रेष्ठोऽपि मनुजः स्वातन्त्र्य लाभार्थं न चेष्टते-इत्याश्चर्यम् ।

१३. परतन्त्रो जीवो मृत समान एव। परतंत्रतावशा ज्जीवानामनुचित कार्येषु प्रवृत्तिर्भवति ।

१४. विहतागस्काः कृतापराधाः । पारेव्योम-गगनपर्यन्तमित्यनेन पाप-प्रचारस्य प्रचुरता ध्वन्यते । 'पारंरेमध्ये षष्ठचावा' ।

१५. विपणिः पण्यवीथिका ।

१६. दुष्प्रवृत्तयः इत्यन्तं प्रताप-वचनम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूर्तिमन्तमुत्साहं विविधाऽऽयुधै परीतम् ।
निजदेशाधिपतिं जलपत्तं वीक्ष्य विनीतम् ॥
प्रजाजनोऽप्यभवत् युद्धाय तदा सन्नद्ध ।
मातृमहीं स्वाधीनां कर्तुमिव प्रतिबद्धः ॥१७॥

अरि - वारण – वारण – क्षम – श्चारण–रणधीरः ।
विनयाऽऽनताऽलिकोऽपि तु कोपित वचनो वीरः ॥
युधि व्यतीत - वयष्कश्चापि वयःस्थम्मन्यः ।
क्रान्ति – गीतिमारेभे कवि – मूर्धन्योधन्यः ॥१८॥

गीतिः

पराधीनतां न परिचिनोषि ।
सैनिक, जन्मभुवः परांव्यथा
मीक्ष्य न बत ! किमु मनो दुनोषि । परा०

मातृ - विमानन - सञ्चित कोपम् ,
विकटावेशं नयनाऽऽटोपम् ।
हृदय - स्पन्दन मनलारोपम् ,
विभावयन्न किं शिरो धुनोषि । परा० ।१९।

सन्ति नयनयो ज्वलदङ्गाराः,
भुजः स्वयं यमदण्डाकाराः ।
विप्लवगोतिर्बत ! चीत्काराः,
इति निष्ठां कथमिव न तनोषि । परा० ।२०।

---

१७. विविधायुधैः परीतम् - शस्त्र - सज्जितम् ।

१८. अरि-वारणाः- रिपुगजास्तेषां निवारणे क्षमः कवितापाठे हुंकारमात्रेण गजानपि प्रतिरोद्धुं समर्थः । चारणो राजस्थाने वीरकाव्यपाठी जाति - विशेषः वयःस्थो युवा । वयसि तिष्ठति "सुपि" इति योग-विभागात्कः

१९. सैनिकोद्बोधनाय प्रतिशोध–प्रवृत्त्यैवोक्तिः

२०. विप्लवो विनाशः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हृदवं ज़्वालामुखं त्घदीयम्,
जनि - दशास्मृतिर्घृतं तदीयम्।
प्रतिशोध: फलमेव यदीयम्,
हन्त! कथं नैवानुमिनोषि। परा० ।२१।

कविवर, भवता किमु न शौर्य - सज्जा स्वीक्रियते ?
कच - कुच - रचना - चिन्तनमद्यापि न संव्रियते ??
भारत जननी - दशया मनसि न किमु ते पीड़ा ?
सतत - विलास - वासना - निरतस्याऽपि व्रीड़ा ?? ।२२।

शोकदशायामपि ते वत! शृंगारे रागः ?
सरस - वसन्ते कस्य मरण - समये - येऽप्यनुरागः ??
श्रूयते न करुणं क्रन्दनमिह किं व्यथितानाम् ?
शमयसि किमु हृदयाधिं नहि रिपु-जनमथितानाम् ?? २३।

सखे! साम्प्रतं साम्प्रतं न ते समय - विरोधः।
नापि तिरस्करणीयो जनताया अनुरोधः॥
सुमस्रजं वर्जय, तर्जय कातरताकीटम्।
गर्ज निर्भयं धृत्वा कण्टकययं किरीटम्॥ ।२४।

रचनायां वत वसतु सदा ते ज्वलनज्वाला।
समुपासिता भवेदपि लय – वेला विकराला॥
धग् धग् धगिति दहेदिह् भारत-मातुः शोकम्।
प्रकाशेन सन्मार्गे प्रवेशयेदपि लोकम्॥ ।२५।

---

२१. जनिर्जननी जन्मभूमिश्च। जननार्थ-परत्वात्।

२२. कविम्प्रति प्रबोधनात्मकोक्तिः। रोलाच्छन्दः।

२३. हृदयाधिम् हार्दिकीं पीड़ाम्।

२४. साम्प्रतम् - सम्प्रति, युक्तं च। सुमस्रजं पुष्पमालाम्।

२५. लय - वेला = प्रलय - समयः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विप्लवगीतिस्ते प्रवर्तयतु झञ्झावातम् ।
सोढुं क्षमा भवेयू रिपवो न यदाघातम् ॥
उद्वेलितो भवेज्जलधिर्गर्जेद् गम्भीरम् ।
तथा क्रान्ति – सन्देशं ध्वनयेद् धीरं धीरम् ॥ ॥२६॥

भवेद् विधाता विमनाः संसृति – सर्जनविरतः ।
प्रलयङ्करः – शङ्करोऽप्यतर्कित - नर्तन - निरतः ॥
सुप्तं जगज्जागरूकत्वमुपेयान्नूनम् ।
चराचरं कम्पयेदलं भय – बाधादूनम् ॥ ॥२७॥

स्मरसि तरुण ! नहि किमिव तरुणतोचितं प्रभावम् ।
निर्गाडतोऽपि सिंहो जहाति किमु सहजं भावम् ॥
शान्तिः सन्तोषाय सन्ततं भवतु नाप्यलम् ।
क्रान्तिमन्तरा कथं जीवनं ते वत ! सफलम् ॥२८॥

विपदि मुदं, मोहे ज्ञानं, धनतमसि प्रकाशम् ।
स्थविरे वयःस्थता माकाशे कुसुम - विकासम् ॥
प्राचीने नूतनतां चैतन्यं जड़तायाम् ।
उद्भावयितुं प्रादुर्भावस्ते जनतायाम् ॥२९॥

आशोद्यमतेजसां त्रिवेणी मनसि वहति ते ।
नानुकूलतां सौख्य-सफलतादयो जहति ते ॥
प्रतिपदमाक्रमणं विपदां सुयशस्ते तनुते ।
करि - कुल - मद - मर्दने केशरी मोदं मनुते ॥३०॥

---

२६. तव रचनया जलधिरप्युद्वेलितो - निर्मर्यादो - भवेदितिभावः ।

२७. विधाताऽपि स्वकार्यं त्यजेत् ।

२८. सम्प्रति तरुणम्प्रति वचनम् ।

२९. असाध्य - साधनायैव ते प्रादुर्भावः

३०. प्रतिपदमापदा सङ्घर्ष एव ते स्वभावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नापि शान्ति - सन्देशस्ते कर्तव्योद्देशः ।
लेशतोऽपि मान्यो न कातराणामुपदेशः ।।
लोके लोकोत्तरो विप्लवः प्रवर्त्तनीयः ।
दृढं षण्ढवादोऽपि देशतो निवर्तनीयः ।।३१।।

प्रतिहत-गतिरपि चिरं त्यज न साहसमुत्साहम् ।
कोऽपि निरोद्धं क्षमो भविष्यति न ते प्रवाहम् ।।
चेतसि चिन्ता भविष्यतो न कदाचन धार्या ।
दृढं विश्वसिहि शक्तिस्ते सन्ततमनिवार्या ।।३२।।

क्षम आन्दोलयितुं सङ्केतस्ते संसारम् ।
अनुकुरुते क्रोधस्ते क्षुब्धं पारावारम् ।।
क्रान्ति-विचारस्ते प्रचारमाप्नोतु नितान्तम् ।
महाप्रलयशङ्खध्वनिरिव कम्पयतु स्वान्तम् ।।३३।।

भवेद्विक्षतं गगनं नक्षत्राणि पतेयुः ।
जलदा ज्वलदङ्गार - वृष्टि - सृष्टौ प्रभवेयुः ।।
नियति-नियम-बन्धं विश्रृङ्खलं कुरु प्रकामम् ।
सम्मुखीनमापादय प्रसभं विधिमपि वामम् ।।३४।।

सपदि साम्प्रतं शत्रुणां सत्वं हरणीयम् ।
अथवा रणभूमौ मरणं शरणं करणीयम् ।।
सुमनस्समास्समानास्सुमनस उच्च-कुलीनाः ।
शिरोऽधिरुढ़ा वाऽपि भवेयुः स्वयं कु-लीना ।।३५।।

---

३१. शान्ति विहाय क्रान्तिरेव तवोपास्या ।

३२. स्वशक्ति - स्मरणायोत्साह-प्रवर्तनम् ।

३३. अननुमेयां शक्तिं स्मारयति ।

३४. आपादयस्य यकारे 'प्रेह्वे वा' इत्यनेन लघुत्वम् ।

३५. सुमनः समाः कुसुम तुल्याः, समानाः मानधनाः उच्चकलीनाः, सुमनसः सज्जनाः । कु - लीनाः भूनिलीनाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतो महाराणा - प्रतापमिह समर्थयध्वम् ।
मातृ - मही - रक्षायां स्वमतिं प्रवर्तयध्वम् ॥
जन्मसिद्धमधिकारं स्वातन्त्र्यं हि मनुध्वम् ।
द्विषदां मदमर्दनेन विशदं यशस्तनुध्वम् ॥३६॥

जागृतव्यमस्माभिः शयनादुत्थातव्यम् ।
अव्यथमनसा शत्रु - सम्मुखम्प्रस्थातव्यम् ॥
अविगणय्य कष्टानि मनः कर्म्मसु योक्तव्यम् ।
दृढ़-सङ्कल्प-बलेन सहज-फलमपि भोक्तव्यम् ॥३७॥

विजय - बैजयन्ती वीरजनैरिह समुच्छ्रीयताम् ।
मुक्तहस्तमिह धनिकै र्धनराशिः प्रदीयताम् ॥
समुत्साह - शङ्खाः समन्ततोऽपि ध्मायन्ताम् ।
प्रलयाम्भोधय इव तरुणाः क्षुब्धा जायन्ताम् ॥३८॥

इत्युक्त्वा चारणवरः प्रशस्तोऽपि विरराम ।
भूमिं स्पृष्ट्वा सविनयं नरनाथाय ननाम ॥३९॥

अन्यैर्भटैः स्वतन्त्रता – व्रतं समैः समधारि ।
श्रद्धा - नतयाजनतया जय - जयकारोऽकारि ॥४०॥

ततो विचारपरं नृपं भामाशाह इयाय ।
भूतपूर्वमिह मन्त्रिणं मुमुदे स विनिध्याय ॥४१॥

विहित - नतिं र्मन्त्री ददौ, कोषानमित - धनस्य ।
संग्रहणार्थं प्रैरयत्, सैनिकवीर - जनस्य ॥४२॥

---

३६. विशदं निर्मलम् ।

३७. अव्यथ - मनसा । वेदनाविहीन ननसा, स्वस्थचित्तेन ।

३८. बैजयन्ती = पताका । प्रलयाम्भोधयः प्रलय-कालिकाः समुद्रा निरन्तरं क्षुब्धा भवन्ति ।

३९. प्रशस्तोऽपि - प्राप्त - प्रंशसोऽपि ।

४०. समैः सर्वैरप्यन्यैर्भटैः स्वतन्त्रता-व्रतमङ्गीकृतम् ।

४१. भामाशाहो नगर - श्रेष्ठी ।

४२. मन्त्री = भामाशाहः । स्वसंचितस्यामितस्व धनस्य कोषान् जन्मभुवः समुद्धाराय ददौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आग्रहेण नरपतिरलं, सैन्यं संजग्राह ।
निजतेजोज्वलनार्चिषा, शत्रुगणं प्रददाह ॥४३॥

मेदपाट - वीरैर्यदा, रणयात्रा समकारि ।
सुकवि – वरैस्तात्कालिकैरेवं तदा व्यचारि ॥४४॥

बकग्रीव – वाजि – व्रजो, नृत्यन्नदन् विभाति ।
अप्रतिहत - गति गजकुलं, निम्नगजलमिव याति ॥४५॥

हस्तेषु हयारोहिणां, दिव्या ध्वजा विभान्ति ।
विस्तृत – पक्षतयो नभसि, गरुडा इव प्रयान्ति ॥४६॥

भास्कर - विभया भासिताः, खड्गा इह सर्वत्र ।
जनयन्ति त्वरितं तड़ि - च्चाकचक्यमपि तत्र ॥४७॥

स्वर्णकवचनिचितान्यहो, सैनिकवरवदनानि ।
राजन्ते दिन - कर - करैं, रिव विकासि - नलिनानि ॥४८॥

दीप्त - कनक - खचिता रथा, स्समुड्डयनमभियन्ति ।
पक्षधराहि सुमेरवो, ध्रुवं नभसि विचरन्ति ।४९॥

अञ्जन - पुञ्ज - निभागजा, गम्भीरं गर्जन्ति ।
मन्ये गिरयः सघन - घन - घोषान् प्रतिध्वनन्ति ॥५०॥

---

४३. अलमत्यर्थं सैन्यम् । धनस्य पर्याप्तत्वेन विपुलसैन्यसङ्ग्रहः । तेजोज्वलनार्चिषा - प्रतापाग्नि - ज्योतिषा ।

४४. तात्कालिकैः = तत्कालभवैः । कालाट्ठञ् ।

४५. निम्नगजलमित्यत्र निम्नगं जलस्य विशेषणमेव । न तु नद्यर्थे प्रयुक्तम् ।

४६. दिव्याश्चित्रविचित्रतया भासमानाः । पक्षतिः पक्षसमूहे ।

४७. सूर्यप्रभा - चमत्कृताः खड्गा विद्युच्चाकचक्यं जनयन्ति इतिभावः ।

४८. सूर्यकिरण-विकसित - कमलानि - इव स्वर्णकवचनिचितानि वदनानि राजन्ते ।

४९. समुड्डयनम् शीघ्रगामित्वादभिहितम् ।

५०. अञ्जन - पुञ्जनिभाः- कज्जल–समूहाकाराः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति चतुरङ्गिण्या युतो नृपो जयाय ससार ।
वृत्रासुरं विहिंसितु मघवा यथा चचार ॥५१॥
प्रथमं नृप मानाधिकृत - पुरमाम्बेरमियाय ।
नहि शैथिल्यमुपागतो वैर – प्रतिशोधाय ॥५२॥
भटानर्दयित्वा रिपोर्मदं मर्दयित्वाऽपि ।
पुरं तर्जता गर्जता जयः प्रतापेनाऽऽपि ॥५३॥
ततो रणस्तम्भो रणे तदधिकृतो विललास ।
उदयपुरं तद्भूषितं चिरं चकासामास ॥५४॥
मेदपाटमखिलं तदा स्वबलेनाऽधिचकार ।
किन्तु न चित्तहरे पुरे ध्वजस्तस्य प्रससार ॥५५॥
अतो न मेवाराधिपो निजं व्रतं तत्याज ।
शासत् स्वाधिकृतां भुवं कुटीरेषु विरराज ॥५६॥
प्रजया विजय महोत्सवः सौत्साहं सममानि ।
हास्य - विलासैरपि परं न मद - प्रभा व्यतानि ॥५७॥
भारत ! धन्य मबोभवीः यत्र स नृपो बभूव ।
धन्यास्तत्काला जना यूयं चिरं बभूव ॥५८॥
भगवन् ! भारत - भूतलं पुनः प्रतापो यातु ।
व्यथयन् दुर्जनमानसं निजधर्मं परिपातु ॥५९॥

---

५१. चतुरङ्गिण्या = सेनयायुतः । मघवा = इन्द्रः ।

५२. वैर - प्रतिशोधाय निर्यातनाय शैथिल्यं नोपागतः ।

५३. अर्दयित्वा पीड़यित्वा । तर्जता - व्यथयता ।

५४. रणस्तम्भः- 'रणथम्भोर' नगरम् ।

५५. चित्तहरे पुरे - 'चित्तौर' माम्नि नगरे ।

५६. अतः स्वप्रतिज्ञा - पूरणाऽभावात् स्व - व्रतं न तत्याज जनेश्वरोऽपि कुटीरेष्वेव च विरराज ।

५७. विजय - महोत्सव - मग्नयाऽपि प्रजया मदप्रभा न व्यतानि ।

५८. बभूवेति प्रथमं प्रथमपुरुषैकवचन । अपरं मध्यम-पुरुष-बहुवचनं च ।

५९. अन्ते च मंगलरूपा प्रार्थना ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणेतुः संस्तवः

लोकाऽलङ्कार - भूतो विलसति भुवने भासुरो भूमिलोकः ।
तत्रेष्टं भारतं तत् सुविदित - विभवं भारती - भारतं यत् ॥
राज्यस्थानं तु तत्राऽप्यमलसमुदयं राजते रत्नरूपम् ।
तत्राऽप्यद्यानवद्यं जयति जयपुरं डूण्डलोदश्च तत्र ॥१॥

तत्र ज्यौतिषिकोऽभवद्वरमतिः प्राप्त – प्रशस्तोन्नतिः ।
शालग्राम - कृती सुसंस्कृतकृति र्देवेज्य - दिव्याकृतिः ॥
आराध्यः सुसदः सदर्चित - पदः श्रेष्ठोऽगदः सत्पदः ।
धर्मा - धर्म - वदावदो जित - मदो विज्ञानदोऽज्ञानदः ॥२॥

सूनुस्तस्य मनस्विनो गुणिगणाऽलङ्कारभूतात्मनः ।
स श्रीमान् व्रजमोहनो विजयते, यत्कीर्ति - चन्द्राश्रिता ॥
सद्यः सा निरवद्य - वैद्य - विदिता विद्याऽद्य विद्योतते ।
प्रत्यक्षे वसुधा सुधामुपगता, रोगैरयोगं प्रजा ॥३॥

काव्याचार्य - पदं गतस्तनुजनु - स्तस्य प्रतिष्ठा - भृतः ।
विज्ञः काव्य - कलानिधिः कवि - महावीर - प्रसादाभिधः ॥
श्री मेवाड़नृप - प्रताप - चरितं प्राणायि तेनाऽञ्जसा ।
काव्यम्भव्य - मदो विभाव्यममलं नव्यं सचेतोजनैः ॥४॥

---

१. साराऽलङ्कारोऽत्राऽवगम्यः ।

२. देवेज्या देवगुरुः । वदावदो वक्ता । सत्पदः सुपदाऽलङ्कृतः अज्ञानदः- अज्ञानच्छेदनः (दो अवखण्डने)

३. यत्कीर्तिचन्द्रश्रिता विद्या तु विद्योतते । वसुधा सुधामुपगता, प्रजा च रोगैर्वियोगं प्राप्ता ।

४. काव्याचार्यपदम् - जयपुरीय - शिक्षाविभाग लब्धं – साहित्याचार्य-पदम् । काव्यकलानिधिपदं तु रा० ब्रा० सम्मेलनतोऽधिगतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जोशी-साहित्य-परिचय

(१) पञ्चतन्त्र (संस्कृत के प्रसिद्ध कथाग्रन्थ का हिन्दी पद्यानुवाद)

(२) विदा (पुत्री की विदा के समय पद्यमय भावोद्गार)

(३) प्रार्थना-पुष्पाञ्जलि (संस्कृत एवं हिन्दी प्रार्थनाएँ)

(४) शक्तिशतक (देवी की स्तुति के सौ पद्य)

(५) श्री शिवमहिम्नः स्तोत्र (हिन्दी पद्यानुवाद)

(६) प्रतापचरितम् (संस्कृत खण्डकाव्य)

(७) विन्द्रावन (राजस्थानी काव्य)

(८) मथरा (राजस्थानी काव्य)

(९) श्रद्धा-सुमन (हिन्दी पद्य) प्रेस में

(१०) दुवारका (राजस्थानी काव्य) (शीघ्र प्रकाश्य)

विवेक प्रकाशन
पो० ब० नं० ११
सादुलपुर ३३१ ०२३

Funding by IKS-MoE